# उदकशान्ति मन्त्रपाठः

Version 2.1 November 15, 2015

# Contents


1 उदकशान्ति ........................................................ 6

1.1 वेदारंभे सर्वसाधारण्येन जप्या: मन्त्रा: ...................... 6

1.2 वेदाधया ........................................................ 6

1.3 रक्षोघ्नं ........................................................ 7

1.4 इन्द्र सूक्तं .................................................... 10

1.5 ये देवा: ........................................................ 13

1.6 ये देवा: (अनुषङ्गं) ........................................... 14

1.7 आयुष्कामेष्टि मन्त्रा: ........................................... 15

1.8 आयुष्कामेष्टि मन्त्रा: (अनुषङ्गं) ............................ 15

1.9 अगंहोमुच मन्त्रा: ............................................... 16

1.10 अगंहोमुच मन्त्रा: (अनुषङ्गं) ................................ 16

1.11 शास्तृ सूक्तं (आप्यं) ......................................... 17

1.12 राष्ट्रभृतं ...................................................... 18

**1.13** राष्ट्रभृतं (अनुषङ्गं)........................................... **19**

**1.14** सर्प सूक्तं................................................. **23**

**1.15** पंचचोडाः.................................................. **23**

**1.16** पंचचोडाः (अनुषङ्गं)........................................ **25**

**1.17** अप्रतिरथ:.................................................. **26**

**1.18** चमकं तृतीय अनुवाकः ...................................... **29**

**1.19** विहव्यम्.................................................. **30**

**1.20** मृगार:.................................................... **31**

**1.21** सर्पाहुती मन्त्रा:............................................ **35**

**1.22** सर्पाहुती मन्त्रा: (अनुषङ्गं)................................ **36**

**1.23** गन्धर्वाहुतीः............................................... **37**

**1.24** गन्धर्वाहुतीः (अनुषङ्गं)..................................... **38**

**1.25** अज्यानि मन्त्रा:........................................... **40**

**1.26** अथर्वशीर्ष................................................ **41**

**1.27** प्रत्यंगिरस:........................................................ **42**

**1.28** अन्न सूक्तं................................................... **48**

**1.29** वाख् सूक्तं.................................................. **49**

**1.30** श्रद्धा सूक्तं.................................................. **51**

**1.31** ब्रह्म सूक्तं.................................................. **52**

**1.32** गो सूक्तं ..................................................... **53**

**1.33** सूर्या चन्द्रमसा सूक्तं........................................ **55**

**1.34** नासदासीय सूक्तं ............................................ **57**

**1.35** भाग्य सूक्तं ................................................. **58**

**1.36** नक्षत्र सूक्तं (वाक्यं)......................................... **60**

**1.37** नक्षत्र उपहोम मन्त्रा: ...................................... **77**

**1.38** वरुण सूक्तं.................................................. **84**

**1.39** पवमान सूक्तं............................................... **85**

**1.40** नक्षत्र सूक्तं (नक्षत्र जप मन्त्राः)........................... **89**

Notes: This Book has been brought to you with the courtesy of some Veda learners who have collaborated to prepare this book.

Please give your feedback, comments and report errors to the e-mail id vedavms@gmail.com. We shall strive to make this book more accurate and error-free.

You may note that there are inherent "paata bedhas" when we compare various sources and books. We have made constant reference to the Taittiriya Sakhaa compiled and commented by Shri. Sayanacharya of 13th Century and Shri Bhatta Bhaskaracharya (period unknown). Their manuscript compilations were later converted into books by great Scholars. One of such sets of "Taittiriya" was printed and published during earlier 1900 A.D. at Govt. Branch Press, Mysore and another set later published under "Anandaashram Series". These Books were referred to by us as our primary source material for this Book.

This book has not been prepared with any commercial purpose and is purely for studies.

**Conventions used in Letters:**

◡ – is represented by (g)

◡◡ – is represented by (gg)

◡̇ – is represented by (gm)

ँ – is represented as anunaasikam

# 1 उदकशान्ति

हरिः ओं ।

श्री गुरुभ्यो नमः

## *1.1 वेदारंभे सर्वसाधारण्येन जप्याः मन्त्राः*

ओं भूः तथ्सवितु–र्वरेण्यं । ओं भुवः भर्गो देवस्य धीमहि ।
ओ॒ँ सुवः धियो योनः प्रचोदयात् । ओं भूः तथ्सवितु–र्वरेण्यं ।
भर्गो देवस्य धीमहि । ओं भुवः धियो योनः प्रचोदयात् ।
ओ॒ँ सुवः तथ्सवितु–र्वरेण्यं भर्गो देवस्य धीमहि ।
धियो योनः प्रचोदयात् । ओं शान्तिः शान्तिः शान्तिः ।

## *1.2 वेदाधया*

ओं । अग्निमीळे पुरोहितं–यज्ञस्य देवमृत्विजं । होतारं रत्न धातमं ।
इषे त्वोर्जेत्वा वायवस्स्थो पायवस्थ देवो वस्सविता प्रार्पयतु
श्रेष्ठतमाय कर्मणे ।

अग्न आयाहि वीतये गृणानो हव्यदातये । निहोता सथ्सि बर्हिषि ।
शन्नो देवीरभिष्टय आपो भवन्तु पीतये । शँ यौरभिस्रवन्तु नः ॥ 1 (1)

## *1.3 रक्षोघ्नं*

कृणुष्व पाजः प्रसितिन्न पृथ्वीं ँयाहि राजे वामवा॑ँ इभेन ।
त्रृष्वी मनु प्रसितिं दूणानोऽस्ताऽसि विध्य रक्ष सस्तपिष्ठैः ।
तव भ्रमास आशुया पतं त्यनुस्पृश–धृषता शोशुचानः ।
तपूँष्यग्ने जुह्वा पतं–गानसन्दितो विसृज विष्व गुल्काः ।
प्रतिस्पशो विसृज–तूर्णितमो भवा पायुर्विशो अस्या अदब्धः ॥ 2

योनो दूरे अघशँ सोयो अन्त्यग्ने माकिष्टे व्यथिरा दधर्षीत् ।
उदग्ने तिष्ठ प्रत्या तनुष्वन्य–मित्राँ ओषता–त्तिग्महेते ।
यो नो अरातिँ समिधान चक्रे नीचा तंधक्ष्यत सन्न शुष्कं ।
ऊर्ध्वो भव प्रति विध्या–ध्यस्मदा विष्कृणुष्व दैव्यान्यग्ने ।
अवस्थिरा तनुहि यातु जूनां जामिमजामिं प्रमृणीहि शत्रून् ॥ 3

सते जानाति सुमतिं ँय विष्ठय ईवते ब्रह्मणे गातुमैरत् ।
विश्वान्यस्मै सुदिनानि रायो द्युम्नान्यर्यो विदुरो अभिद्यौत् ।
सेदग्ने अस्तु सुभग स्सुदानुर्यस्त्वा नित्येन हविषा य उक्थैः ।
पिप्रीषति स्व आयुषि दुरोणे विश्वेदस्मै सुदिना–साऽसदिष्टिः ।
अर्चामिते सुमतिं घोष्यर्वाख्–सन्ते वा वाता जरता मियंगीः ॥ 4

स्वश्वास्त्वा सुरथा मर्जये–मास्मे क्षत्राणि धारयेर–नुद्यून् ।
इह त्वा भूर्या चरेदुपत्मन् दोषावस्त दीदिवा ँ् समनुद्यून् ।
क्रीडन्तस्त्वा सुमनस स्सपेमाभि द्युम्ना तस्थिवा ँ् सोजनानां ।
यस्त्वा स्वश्वस्सु–हिरण्यो अग्न उपयाति वसुमता रथेन ।
तस्य त्राता भवसि तस्य सखा यस्त आतिथ्य मानुषग् जुजोषत् ॥ 5

महोरुजामि बन्धुता वचो भिस्तन्मा पितुर्गोतमाद न्वियाय ।
त्वन्नो अस्य वचस–श्चिकिद्धि होतर्यविष्ठ सुक्रतो दमूनाः ।
अस्वप्न जस्तरणय स्सुशेवा अतन्द्रासोऽवृका अश्रमिष्ठाः ।

ते पायवः सध्रियञ्चो निषद्याग्ने तव नः पान्त्वमूर ।
ये पायवो मामतेयं ते अग्ने पश्यन्तो अन्धं दुरिताद रक्षन्न् ।
ररक्ष तान्थ् सुकृतो विश्ववेदा दिप्सन्त इद्रिपवो नाह देभुः ॥ 6

त्वया वयꣳ सधन्य-स्त्वोता स्तव प्रणीत्य श्याम वाजान् ।
उभाशꣳ सा सूदय सत्यता तेऽनुष्ठुया कृणुह्य-ह्रयाण ।
अया ते अग्ने समिधा विधेम प्रतिस्तोमꣳ शस्यमानं गृभाय ।
दहाशसो रक्षसः पाह्यस्मान् दुहो निदो मित्रमहो अवद्यात् ।
रक्षोहणं वाजिनमाजि घर्मि मित्रं प्रथिष्ठ मुपयामि शर्म ।
शिशानो अग्निः क्रतुभि स्समिद्ध-स्सनो दिवा स रिषः पातु नक्तं ॥ 7

विज्योतिषा बृहता भात्यग्नि रावि-र्विश्वानि कृणुते महित्वा ।
प्रादेवीर्माया स्सहते दुरेवा शिशीते शृंगे रक्षसे विनिक्षे ।
उतस्वानासो दिविषन्त्वग्ने स्तिग्मायुधा रक्षसे हन्त वा उ ॥ 8 (2)

## *1.4 इन्द्र सूक्तं*

इन्द्रं वो विश्वतस्परि हवामहे जनेभ्यः । अस्माकमस्तु केवलः ।
इन्द्रं नरो नेमधिता हवन्ते यत्पार्या युनजते धियस्ताः ।
शूरो नृषाता शवसश्चका न आ गोमति व्रजे भजा त्वन्नः ।
इन्द्रियाणि शतक्रतो या ते जनेषु पञ्चसु । इन्द्र तानि त आ वृणे ।
अनुते दायि मह इन्द्रियाय सत्राते विश्वमनु वृत्रहत्ये ॥ **9**

अनु क्षत्रमनु सहो यजत्रेन्द्र देवेभिरनु ते नृषह्ये ।
आयस्मिन्थ् सप्तवासवा स्तिष्ठन्ति स्वारुहो यथा ।
ऋषिर्ह दीर्घ श्रुत्तम इन्द्रस्य घर्मो अतिथिः ।
आमासु पक्वमैरय आ सूर्यं रोहयो दिवि ।
घर्मन्न सामन्तपता सुवृक्तिभि–र्जुष्टं गिर्वण सेगिरः ।
इन्द्रमिद् गाथिनो बृहदिन्द्र मर्केभि रर्किणः । इन्द्रं वाणीरनूषत ॥ **10**

गायन्तित्वा गायत्रिणो र्चं त्यर्क मर्किणः ।
ब्रह्माणस्त्वा शतक्रत–वुद्व८ शमिव ये मिरे ।
अ८हो मुचे प्रभरेमा मनीषा मोषिष्ठ–दाव्ने सुमतिं गृणानाः ।
इदमिन्द्र प्रति हव्यं गृभाय सत्यास्सन्तु यजमानस्य कामाः ।
विवेषयन्मा धिषणा जजान स्तवै पुरा पार्यादिन्द्र महः ।
अ८हसो यत्र पीपरद्यथा नो नावेव यान्त मुभये हवन्ते ॥ 11

प्रसम्राजं प्रथम मध्व–राणाम८ हो मुचं ँवृषभं ँयज्ञियानां ।
अपान्न–पातमश्विना हयन्त मस्मिन्नर इन्द्रियं धत्तमोजः ।
विन इन्द्र मृधो जहि नी चा यच्छ पृतन्यतः ।
अधस्पदं तमीं कृधि यो अस्मा८ अभिदासति ।
इन्द्रक्षत्र मभि वाममोजो ऽजायथा वृषभ चर्षणीनां ।
अपानुदो जनममित्र यन्त मुरुं देवेभ्यो अकृणोरु लोकं ।
मृगो न भीमः कुचरो गिरिष्ठाः परावत आजगामा–परस्याः ॥ 12

सृक॒ँ स॒ँ शाय पविमिन्द्र तिग्मं विशत्रून् ताडि विमृधो नुदस्व ।
विशत्रून् विमृधोनुद विवृत्रस्य हनू रुज ।
विमन्युमिन्द्र भामितो ऽमित्रस्याभि दासतः ।
त्रातारमिन्द्र मवितार मिन्द्रँ हवे हवे सुहवँ शूरमिन्द्रं ।
हुवे नु शक्रं पुरुहूत मिन्द्रँ स्वस्ति नो मघवा धात्विन्द्रः ॥ **13**

मा ते अस्याँ सहसावन् परिष्टा वघाय भूम हरिवः परादै ।
त्रायस्वनो ऽवृकेभि–र्वरूथै स्तव प्रियास स्सूरिषु स्याम ।
अनवस्ते रथमश्वाय तक्षन्–त्वष्टा वज्रं पुरुहूत द्युमन्तं ।
ब्रह्माण इन्द्रं महयन्तो अर्कैरवर्द्धय–न्नहये हन्त वा उ ।
वृष्णे यत्ते वृषणो अर्कमर्चा निन्द्र ग्रावाणो अदिति–स्सजोषाः ।
अनश्वासो ये पवयोऽरथा इन्द्रेषिता अभ्यवर्त्त तदस्यून् ॥ **14 (3)**

यत इन्द्र भयामहे ततो नो अभयं कृधि ।
मघवन् च्छग्धि तव तन्न ऊतये विद्विषो विमृधो जहि ।
स्वस्तिदा विशस्पति–र्वृत्रहा विमृधो वशी ।

वृषेन्द्रः पुर एतु न स्स्वस्तिदा अभयं करः ।

महाँ इन्द्रो वज्र बाहु षोडशी शर्म यच्छतु ।

स्वस्ति नो मघवा करोतु हन्तु पाप्मानं योऽस्मान् द्वेष्टि ।

सजोषा इन्द्र सगणो मरुद्भि स्सोमं पिब वृत्रहन् च्छूर विद्वान् ।

जहि शत्रूँ रपमृधो–नुदस्वाथा भयं कृणुहि विश्वतो नः ॥ **15 (4)**

## ***1.5 ये देवा:***

ये देवाः पुरस्सदोऽग्नि नेत्रा, दक्षिणसदो यमनेत्रा, पश्चाथ्सद स्सवितृ नेत्रा,

उत्तरसदो वरुणनेत्रा , उपरिषदो बृहस्पति नेत्रा ,

रक्षोहणस्ते नः पान्तु ते नोऽवन्तु तेभ्यो नमस्तेभ्य स्स्वाहा–ऽग्नये

रक्षोघ्ने स्वाहा,

यमाय सवित्रे वरुणाय बृहस्पतये दुवस्वते रक्षोघ्ने स्वाहा ॥ **16 (5**)

## 1.6 ये देवा: (अनुषङ्गं)

ये दे॒वाः पु॒रस्सदो॒ऽग्नि नेत्रा रक्षो॒ह॒णस्तेनः पान्तु॒ ते नोऽवन्तु॒ तेभ्यो॒ नम॒स्तेभ्य॒ स्स्वाहा ।

ये दे॒वा दक्षिण॒सदो॒ य॒म नेत्रा रक्षो॒ह॒णस्तेनः पान्तु॒ ते नोऽवन्तु॒ तेभ्यो॒ नम॒स्तेभ्य॒ स्स्वाहा ।

ये दे॒वाः पश्चा॒थ्सद स्सवि॒तृ नेत्रा रक्षो॒ह॒णस्तेनः पान्तु॒ ते नोऽवन्तु॒ तेभ्यो॒ नम॒स्तेभ्य॒ स्स्वाहा ।

ये दे॒वा उत्तर॒सदो॒ वरुणनेत्रा रक्षो॒ह॒णस्तेनः पान्तु॒ ते नोऽवन्तु॒ तेभ्यो॒ नम॒स्तेभ्य॒ स्स्वाहा ।

ये दे॒वा उपरि॒षदो॒ बृह॒स्पति नेत्रा रक्षो॒ह॒णस्तेनः पान्तु॒ ते नोऽवन्तु॒ तेभ्यो॒ नम॒स्तेभ्य॒ स्स्वाहा ।

अग्नये रक्षो॒घ्ने स्वाहा । य॒माय रक्षो॒घ्ने स्वाहा ।

सवि॒त्रे र॒क्षोघ्ने स्वाहा । वरुणाय रक्षो॒घ्ने स्वाहा ।

बृ॒हस्पतये दु॒वस्वते रक्षो॒घ्ने स्वाहा ॥ **16A (5A)**

## 1.7 आयुष्कामेष्टि मन्त्राः

अग्निरायुष्मान्थ्स वनस्पतिभि–रायुष्मान् तेनत्वाऽऽयुषाऽऽयुष्मन्तं करोमि ,
सोम आयुष्मान्थ्स ओषधीभि, र्यज्ञ आयुष्मान्थ्स दक्षिणाभि, र्ब्रह्मायुष्मत्तद्
ब्राह्मणै–रायुष्मद्, देवा आयुष्मन्तस्ते ऽमृतेना–
युष्मन्तस्तेनत्वा ऽऽयुषाऽऽयुष्मन्तं करोमि ॥ **17 (6)**

## 1.8 आयुष्कामेष्टि मन्त्राः (अनुषङ्गं)

अग्निरायुष्मान्थ्स वनस्पतिभि रायुष्मान् तेनत्वा ऽऽयुषाऽऽयुष्मन्तं करोमि ।

सोम आयुष्मान्थ्स ओषधीभिरायुष्मान् तेनत्वाऽऽयुषाऽऽयुष्मन्तं करोमि ।
यज्ञ आयुष्मान्थ्स दक्षिणाभिरायुष्मान् तेनत्वा ऽऽयुषाऽऽयुष्मन्तं करोमि ।
ब्रह्मायुष्मत्तद् ब्राह्मणै–रायुष्मत् तेनत्वा ऽऽयुषाऽऽयुष्मन्तं करोमि ।
देवा आयुष्मन्तस्ते ऽमृते–नायुष्मन्तस्तेनत्वा
ऽऽयुषाऽऽयुष्मन्तं करोमि ॥ **17A(6A)**

## 1.9 अग्ंहोमुच मन्त्रा:

या वामिन्द्रा वरुणा यतव्या तनूस्तये ममꣳहसो मुंचतं ,

ꣳया वामिन्द्रा वरुणा सहस्या रक्षस्या तेजस्या तनूस्तये ममꣳ हसो मुंचतं,

ꣳयो वामिन्द्रा वरुणा वग्नौ स्रामस्तं ꣳवा मेतेना वयजे ,

यो वामिन्द्रा वरुणा द्विपाथ्सु पशुषु चतुष्पाथ्सु गोष्ठे

गृहेष्वफ्सोषधीषु वनस्पतिषु स्रामस्तं ꣳवा मेतेना वयजे ॥ **18 (7)**

## 1.10 अग्ंहोमुच मन्त्रा: (अनुषङ्गं)

या वामिन्द्रा वरुणा यतव्या तनूस्तये ममꣳ हसो मुंचतं ।

या वामिन्द्रा वरुणा सहस्या तनूस्तये ममꣳ हसो मुंचतं ।

या वामिन्द्रा वरुणा रक्षस्या तनूस्तये ममꣳ हसो मुंचतं ।

या वामिन्द्रा वरुणा तेजस्या तनूस्तये ममꣳ हसो मुंचतं ।

यो वामिन्द्रा वरुणा वग्नौ स्रामस्तं वामे तेना वयजे ।

यो वामिन्द्रा वरुणा द्विपाथ्सु पशुषु स्रामस्तं वामे तेना वयजे ।

यो वामिन्द्रा वरुणा चतुष्पाथ्सु पशुषु स्रामस्तं वामे तेना वयजे ।

यो वामिन्द्रा वरुणा गोष्ठे स्नामस्तं वामे तेना वयजे ।
यो वामिन्द्रा वरुणा गृहेषु स्नामस्तं वामे तेना वयजे ।
यो वामिन्द्रा वरुणाऽप्सु स्नामस्तं वामे तेना वयजे ।
यो वामिन्द्रा वरुणौषधीषु स्नामस्तं वामे तेना वयजे ।
यो वामिन्द्रा वरुणा वनस्पतिषु स्नामस्तं
वामे तेना वयजे ॥ **(18A) (7A)**

## *1.11 शास्तृ सूक्तं (आप्यं)*

अग्ने यशस्विन् यशसे ममर्पयेन्द्रावती मपचिती मिहावह ।
अयं मूर्द्धा परमेष्ठी सुवर्चा–स्समानाना मुत्तम श्लोको अस्तु ।
भद्रं पश्यन्त उपसेदुरग्रे तपो दीक्षा मृषय स्सुवर्विदः ।
ततः क्षत्रं बलमोजश्च जातं तदस्मै देवा अभिसन्न–मन्तु ।
धाता विधाता परमोत सन्दृक् प्रजापतिः परमेष्ठी विराजा ।
स्तोमा–श्छन्दाꣳसि निविदोम आहुरेतस्मै राष्ट्रमभि–सन्नमाम ।

अभ्यावर्त्तद्ध्व-मुपमेत साकमय९ शास्ता-ऽधिपतिर्वो अस्तु ।
अस्य विज्ञानमनुस९-रभद्ध्वमिमं पश्चादनु जीवाथ सर्वे ॥ **19 (8)**

## *1.12 राष्ट्रभृतं*

ऋताषाड् ऋतधामाऽग्नि-र्गन्धर्वस्त-स्यौषधयोऽप्सरस ऊर्जो नाम
स इदं ब्रह्म क्षत्रं पातु ता इदं ब्रह्म क्षत्रं पान्तु तस्मै स्वाहा ताभ्य स्स्वाहा ,
स९हितो विश्वसामा सूर्यो गन्धर्व-स्तस्य मरीचयोऽप्सरस आयुव ,
स्सुषुम्न स्सूर्य रश्मि-श्चन्द्रमा गन्धर्व-स्तस्य नक्षत्राण्य-प्सरसो बेकुरयो,
भुज्युस्सुपर्णो यज्ञो गन्धर्व-स्तस्य दक्षिणा अप्सरस स्तवाः,
प्रजापति-र्विश्वकर्मा मनो गन्धर्वस्तस्यर्ख् सामान्य-प्सरसो वह्नय,
इषिरो विश्व व्यचा वातो गन्धर्व-स्तस्यापो ऽप्सरसो मुदा,
भुवनस्य पते यस्यत उपरि गृहा इह च ।
स नो रास्वाज्यानि९ रायस्पोष९ सुवीर्य९ संवँथ्सरीणा७ स्वस्तिं ।

परमेष्ठ्यधिपति–र्मृत्युर् गन्धर्व–स्तस्य विश्वमप्सरसो भुव,

स्सुक्षिथि– स्सुभूति–र्भद्रकृथ् सुवर्वान् पर्जन्यो गन्धर्व–स्तस्य विद्युतो

ऽप्सरसो रुचो, दूरे हेतिर–मृडयो मृत्युर् गन्धर्व–स्तस्य प्रजा

अप्सरसो भीरुवः;

चारुः कृपण काशी कामो गन्धर्व–स्तस्याधयो ऽप्सरस श्शोचयन्ती ,

र्नाम स इदं ब्रह्म क्षत्रं पातु ता इदं ब्रह्म क्षत्रं पान्तु तस्मै स्वाहा

ताभ्य स्स्वाहा,

स नो भुवनस्य पते यस्यत उपरि गृहा इह च ।

उरु ब्रह्मणेऽस्मै क्षत्राय महि शर्म यच्छ ॥ **20 (9)**

## *1.13 राष्ट्रभृतं (अनुषङ्गं)*

ऋताषाड् ऋतधामाऽग्नि –र्गन्धर्वस्स– इदं ब्रह्म क्षत्रं पातु

तस्मै स्वाहा ।

तस्यौषधयोऽप्सरस ऊर्जो नाम ता इदं ब्रह्म क्षत्रं पान्तु

ताभ्य स्स्वाहा ॥

सꣳहितो विश्वसामा सूर्यो गन्धर्वस्स इदं ब्रह्म क्षत्रं पातु

तस्मै स्वाहा ।

तस्य मरीचयोऽप्सरस आयुवो नाम ता इदं ब्रह्म क्षत्रं पान्तु

ताभ्य स्स्वाहा ॥

सुषुम्नस्सूर्य–रश्मिश्चन्द्रमा गन्धर्वस्स इदं ब्रह्म क्षत्रं पातु

तस्मै स्वाहा ।

तस्य नक्षत्राण्य ऽप्सरसो बेकुरयो नाम ता इदं ब्रह्म क्षत्रं पान्तु

ताभ्य स्स्वाहा ॥

भुज्युस्सुपर्णो यज्ञो गन्धर्वस्स इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा ।

तस्य दक्षिणा अफ्सरस स्तवा नाम ता इदं ब्रह्म क्षत्रं पान्तु

ताभ्य स्स्वाहा ॥

प्रजापति –र्विश्वकर्मा मनो गन्धर्वस्स इदं ब्रह्म क्षत्रं पातु

तस्मै स्वाहा ।

तस्यर्ख् सामान्य–ऽप्सरसो वह्नयो नाम ता इदं ब्रह्म क्षत्रं पान्तु

ताभ्य स्स्वाहा ॥

इषिरो विश्वव्यचा वातो गन्धर्वस्स इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा ।

तस्यापो–ऽप्सरसो मुदा नाम ता इदं ब्रह्म क्षत्रं पान्तु

ताभ्य स्स्वाहा ॥

भुवनस्य पते यस्यत उपरि गृहा इह च ।

स नो रास्वाज्यानिꣳ रायस्पोषꣳ सुवीर्यꣳ संवथ्सरीणाꣳ

स्वस्तिꣳ स्वाहा ॥

परमेष्ठ्यधिपति –र्मृत्यु र्गन्धर्वस्स इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा ।

तस्य विश्वमप्सरसो भुवो नाम ता इदं ब्रह्म क्षत्रं पान्तु

ताभ्य स्स्वाहा ॥

सुक्षिथि–स्सुभूति –र्भद्रकृथ् सुवर्वान् पर्जन्यो गन्धर्वस्स इदं ब्रह्म

क्षत्रं पातु तस्मै स्वाहा ।

तस्य विध्युतो–ऽप्सरसो रुचो नाम ता इदं ब्रह्म क्षत्रं पान्तु

ताभ्य स्स्वाहा ॥

दूरे हेतिर मृडयो मृत्यु गन्धर्वस्स इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा ।

तस्य प्रजा अफ्सरसो भीरुवो नाम ता इदं ब्रह्म क्षत्रं पान्तु

ताभ्य स्स्वाहा ॥

चारुः कृपण काशी कामो गन्धर्वस्स इदं ब्रह्म क्षत्रं पातु

तस्मै स्वाहा ।

तस्याधयो ऽप्सरस श्शोचयन्ति र्नाम ता इदं ब्रह्म क्षत्रं पान्तु

ताभ्य स्स्वाहा ॥

स नो भुवनस्यपते यस्यत उपरि गृहा इह च ।

उरु ब्रह्मणेऽस्मै क्षत्राय महि शर्म यच्छ स्वाहा ॥ **(20A) (9A)**

## *1.14 सर्प सूक्तं*

नमो अस्तु सर्पेभ्यो ये के च पृथिवी मनु ।

ये अन्तरिक्षे ये दिवि  तेभ्य स्सर्पेभ्यो नमः ।

येऽदो रोचने दिवो ये वा सूर्यस्य रश्मिषु ।

येषामफ्सु सदः कृतं तेभ्य स्सर्पेभ्यो नमः ।

या इषवो यातु धानानां ये वा वनस्पतीꣳ रनु  ।

ये वाऽवटेषु शेरते तेभ्य स्सर्पेभ्यो नमः ॥ **21 (10)**

## *1.15 पंचचोडाः*

अयं पुरो हरिकेश स्सूर्यरश्मि–स्तस्य रथगृथ्सश्च रथौजाश्च सेनानि

ग्रामण्यौ पुञ्जिकस्थला च कृतस्थला चाफ्सरसौ यातु धाना हेती

रक्षाꣳसि प्रहेति ,

रयं दक्षिणा विश्व कर्मा तस्य रथ स्वनश्च रथे–चित्रश्च सेनानि ग्रामण्यौ मेनका च सहजन्या चाऽफ्सरसौ दङ्ष्णवः पशवो हेतिः पौरुषेयो वधः प्रहेति ,

रयं पश्चाद् विश्व–व्यचा स्तस्य रथ प्रोतश्चा–समरथश्च सेनानि ग्रामण्यौ प्रम्लोचन्ती चा नुम्लोचन्ती–चाऽफ्सरसौ सर्पा हेति र्व्याघ्राः प्रहेति ,

रय मुत्तराथ् सं यँद्वसुस्तस्य सेनजिच्च सुषेणश्च सेनानि ग्रामण्यौ विश्वाचीच घृताची चा–फ्सरसा वापो हेति र्वातः प्रहेति ,

रय–मुपर्य र्वाग्व–सुस्तस्य तार्क्ष्य–श्चारिष्ट–नेमिश्च सेनानि ग्रामण्या वुर्वशी च पूर्वचित्तिश्चा–फ्सरसौ विद्युद्धेतिर–वस्पूर्जन् प्रहेति ,

स्तेभ्यो नमस्ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जंभे दधामि ॥ **22 (11)**

## 1.16 पंचचोडाः (अनुषङ्गं)

अयं पुरो हरिकेश स्सूर्यरश्मि–स्तस्य रथगृथ्सश्च रथौजाश्च सेनानि
ग्रामण्यौ पुञ्जिकस्थला च कृतस्थला चाप्सरसौ यातुधाना हेती
रक्षाᳪंसि प्रहेतिस्तेभ्यो नमस्ते नो मृडयन्तुते यं द्विष्मो यश्च नो द्वेष्टि तं
वो जंभे दधामि ।

अयं दक्षिणा विश्वकर्मा तस्य रथस्वनश्च रथे चित्रश्च सेनानि ग्रामण्यौ
मेनका च सहजन्या चाप्सरसौ दङ्ष्णवः पशवो हेतिः पौरुषेयो वधः
प्रहेतिस्तेभ्यो नमस्ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तं
वो जंभे दधामि ।

अयं पश्चाद्–विश्व व्यचा–स्तस्य रथप्रोतश्चा–समरथश्च सेनानि ग्रामण्यौ
प्रम्लोचन्तीचा नुम्लोचन्ती–चाप्सरसौ सर्पा हेति र्व्याघ्राः
प्रहेतिस्तेभ्यो नमस्ते नो मृडयन्तु तेयं द्विष्मो यश्च नो द्वेष्टि तं
वो जंभे दधामि ।

अय–मुत्तराथ् सं यद्वसुस्तस्य सेनजिच्च सुषेणश्च सेनानि ग्रामण्यौ
विश्वाचीच घृताचीचा–फ्सरसा वापो हेति र्वातः प्रहेतिस्तेभ्यो नमस्ते
नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तं ँवो जंभे दधामि ।

अयमुपर्य र्वाग्वसुस्तस्य ताक्ष्यं–श्चारिष्ट–नेमिश्च सेनानि ग्रामण्या
वुर्वशी च पूर्वचित्ति–चाफ्सरसौ विद्युद्धेतिर–वस्पूर्जन् प्रहेतिस्तेभ्यो
नमस्ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तं ँवो
जंभे दधामि ॥ **22A(11A)**

## *1.17 <u>अप्रतिरथः</u>*

आशुः शिशानो वृषभो न युध्मो घनाघनः क्षोभण–श्चर्षणीनां ।
संक्रन्दनोऽनिमिष एक वीरश्शत९् सेना अजयथ्सा–कमिन्द्रः ।
संक्रन्दनेना निमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना ।
तदिन्द्रेण जयत तथ् सहध्वं ँयुधो नर इषु हस्तेन वृष्णा ।
स इषुहस्तैः स निषंगिभिर्वशी स८ स्रष्टा स युध इन्द्रो गणेन ।

सऽ्॒सृ॒ष्टजि॑थ् सोम॒पा बा॑हु श॒र्ध्यू॑र्द्ध्व धन्वा॒ प्रति॑हिता॒भि रस्ता॑ ।
बृह॑स्पते॒ परि॑दीया॒ रथे॑न रक्षो॒हा ऽमित्रा॑ऽ्॒‌ अप॒ बाधमानः ॥ 23

प्र॒भं॒जन्थ् सेना॑ः प्र॒मृणो॑ यु॒धा जय॒न्नस्माक॑मे॒ध्यवि॒ता रथा॑नां ।
गो॒त्र॒भिदं॑ गो॒वि॒दं॑ वज्र॒बाहुं॑ जय॒न्तमज्म॑ प्र॒मृण॒न्त॑मोजसा ।
इ॒मऽ्॒‌ स॑जा॒ता अ॑नुवीर॒यध्व मिन्द्र॑ऽ्॒‌ सखा॒यो॒ऽनु स॒ऽ्॒‌ रभध्वं॑ ।
ब॒ल॒वि॒ज्ञा॒य॒ः स्थवि॑रः प्र॒वीर॑स्सहस्वा॒न् वाजी सहमान उ॒ग्रः ।
अ॒भिवी॑रो अ॒भिस॑त्वा सहो॒जा जैत्र॑मि॒न्द्र र॒थमा॑तिष्ठ गो॒वित् ॥ 24

अ॒भि॒गो॒त्रा॒णि सह॑सा॒ गाह॑मानो॒ऽदायो वी॒रश्श॒तम॒न्यु॒रिन्द्रः ।
दु॒श्च्य॒व॒नः पृ॑तना॒षाड यु॒ध्यो॑स्मा॒क॒ऽ्॒‌ सेना अ॑वतु॒ प्रयु॒थ्सु॑ ।
इन्द्र॑ आसांने॒ता बृ॒ह॒स्पति॒ र्दक्षि॑णा य॒ज्ञः पु॒र ए॑तु॒ सो॑मः ।
दे॒व॒से॒नाना॑मभिभञ्जती॒नां जय॑न्तीनां म॒रुतो॑ य॒न्त्वग्रे॑ ।
इन्द्र॑स्य॒ वृष्णो॒ वरु॑णस्य॒ राज्ञ॑ आदि॒त्यानां॑ म॒रुता॒ऽ्॒‌ शर्द्ध उ॒ग्रं॑ ।
म॒हाम॑नसां भुवनच्य॒वा॒नां॒ घोषो॑ दे॒वा॒नां॒ जय॑ता॒ मुदस्था॑त् ।
अ॒स्माक॒मिन्द्र॒स्समृ॑तेषु ध्व॒जेष्व॒स्माकं॒ याँ इष॑व॒स्ता जय॑न्तु ॥ 25

अस्माकं वीरा उत्तरे भवन्त्वस्मानु देवा अवता हवेषु ।
उद्धर्षय मघवन्ना–युधान्युत्–सत्वनां मामकानां महाꣳसि ।
उद्वृत्रहन्–वाजिनां वाजिनान्युद्रथानां जयतामेतु घोषः ।
उपप्रेत जयता नरःस्थिरा वस्सन्तु बाहवः ।
इन्द्रो वः शर्म यच्छ त्वना–धृष्या यथासथ ।
अवसृष्टा परापत शरव्ये ब्रह्म सꣳशिता ॥ **26**

गच्छामित्रान् प्रविश मैषां कञ्चनोच्छिषः ।
मर्माणि ते वर्मभिश्छादयामि सोमस्त्वा राजा ऽमृतेनाभि–वस्तां ।
उरोर्वरीयो वरिवस्ते अस्तु जयन्तं त्वामनु मदन्तु देवाः ।
यत्र बाणा–स्संपतन्ति कुमारा विशिखा इव ।
इन्द्रो नस्तत्र वृत्रहा विश्वाहा शर्म यच्छतु ॥ **27 (12)**

## *1.18 चमकं तृतीय अनुवाकः*

शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे

कामश्च मे सौमनसश्च मे भद्रं च मे श्रेयश्च मे

वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे

यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे

विश्वं च मे महश्च मे **(28)**

संविँच्च मे ज्ञात्रं च मे

सूश्च मे प्रसूश्च मे सीरं च मे लयश्च म

ऋतं च मेऽमृतं च मे ऽयक्ष्मं च मेऽनामयच्च मे

जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे

सुगं च मे शयनं च मे सूषा च मे सुदिनं च मे ॥ **29 (13)**

## *1.19 विहव्यम्*

ममाग्ने वर्चो विहवेष्वस्तु वयं त्वेन्धाना स्तनुवं पुषेम ।
मह्यं नमन्तां प्रदिशश्चतस्र स्त्वया–ऽद्ध्यक्षेण पृतना जयेम ।
मम देवा विहवे सन्तु सर्व इन्द्रावन्तो मरुतो विष्णुरग्निः ।
ममान्तरिक्ष मुरु गोपमस्तु मह्यं वातः पवतां कामे अस्मिन्न् ।
मयि देवा द्रविण मायजन्तां मय्या शीरस्तु मयि देवहूतिः ॥ 30

दैव्या होतारा वनिषन्त पूर्वे ऽरिष्टा–स्स्याम तनुवा सुवीराः ।
मह्यं यजन्तु मम यानि हव्याऽऽकूति स्सत्या मनसो मे अस्तु ।
एनो मानिगां कतमच्च नाहं विश्वे देवासो अधिवोच ता मे ।
देवी ष्षडुर्वीरुरुणः कृणोत विश्वे देवा स इह वीरयद्ध्वं ।
माहास्महि प्रजया मा तनूभि र्मारधाम द्विषते सोमराजन्न् ।
अग्निर्मन्युं प्रतिनुदन् पुरस्ता–ददब्धो गोपाः परिपाहि नस्त्वं ॥ 31

प्रत्यञ्चो यन्तु निगुतः पुनस्ते ऽमैषां चित्तं प्रबुधा विनेशत् ।
धाता धातृणां भुवनस्य यस्पति र्देव९ सवितारमभि मातिषाहं ।

इमं यँज्ञ मश्विनोभा बृहस्पति र्देवाः पान्तु यजमानन् न्यर्त्थात् ।
उरुव्यचा नो महिष श्शर्मय९् सदस्मिन् हवे पुरुहूतः पुरुक्षु ।
स नः प्रजायै हर्यश्च मृडयेन्द्र मा नो रीरिषो मा परादाः ॥ **32**
ये न स्सपत्ना अपते भवन्त्विन्द्रा–ग्निभ्या मव बाधामहे तान् ।
वसवो रुद्रा आदित्या उपरि स्पृशं मोग्रं–चेत्तारमधि राजमक्रन्न् ।
अर्वाञ्च मिन्द्र ममुतो हवामहे यो गोजिद्–धन–जिदश्च–जिद्यः ।
इमन्नो यज्ञं विहवे जुषस्वास्य कुर्मो हरिवो मेदिनं त्वा ॥ **33 (14)**

## *1.20 मृगार:*

अग्ने र्मन्वे प्रथमस्य प्रचेतसोयं पाञ्च–जन्यं बहव स्समिन्धते ।
विश्वस्यां विशि प्रविविशिवा९् समीमहे स नो मुञ्चत्व९् हसः ।
यस्येदं प्राण–न्निमिषद् यदेजति यस्य जातं जनमानं च केवलं ।
स्तौम्यग्निं नाथितो जोहवीमि स नो मुञ्चत्व९् हसः ।
इन्द्रस्य मन्ये प्रथमस्य प्रचेतसो वृत्रघ्नः स्तोमा उपमा मुपागुः ।
यो दाशुषः सुकृतो हवमुप गन्ता स नो मुञ्चत्व९् हसः ॥ **34**

य स्संग्रामं नयति सँवशी युधे यः पुष्टानि सꣳसृजति त्रयाणि ।
स्तौमीन्द्रं नाथितो जोहवीमि स नो मुञ्चत्वꣳ हसः ।
मन्वेवां मित्रा वरुणा तस्य वित्तꣳ सत्यौजसा दृꣳहणा यं नुदेथे ।
या राजानꣳ सरथं याथ उग्रा ता नो मुञ्चत मागसः ।
यो वाꣳ रथ ऋजुरश्मिः सत्यधर्मा मिथु–श्चरन्त–मुपयाति दूषयन्न् ॥ 35

स्तौमि मित्रा वरुणा नाथितो जोहवीमि तौ नो मुञ्चत मागसः ।
वायो–स्सवितु र्विदथानि मन्महे यावात्मन्–वद्बिभृतो यौ च रक्षतः ।
यौ विश्वस्य परिभू बभूवतुस्तौ नो मुञ्चत मागसः ।
उपश्रेष्ठान आशिषो देवयोर्धर्मे अस्थिरन्न् ।
स्तौमि वायुꣳ सवितारं नाथितो जोहवीमि तौ नो मुञ्चत मागसः ।
रथीतमौ रथीना मह्व ऊतये शुभंगमिष्ठौ सुयमे–भिरश्वैः ॥ 36

ययोर्वान् देवौ देवेष्व–निशित मोजस्तौ नो मुञ्चत मागसः ।
यदयातं वँहतुꣳ सूर्याया–स्त्रिचक्रेण सꣳ सदमिच्छमानौ ।
स्तौमि देवा वश्विनौ नाथितो जोहवीमि तौ नो मुञ्चत मागसः ।

मरुतां मन्वे अधिनो ब्रुवन्तु प्रेमां ँवाचं विश्वा मवन्तु विश्वे ।

आशून् हुवे सुयमानूतये ते नो मुञ्चन्त्वेनसः ।

तिग्ममायुधं ँवीडितꣳ सहस्वद् दिव्यꣳ शर्द्धः पृतनासु जिष्णु ॥ 37

स्तौमि देवान् मरुतो नाथितो जोहवीमि ते नो मुञ्चन्त्वेनसः ।

देवानां मन्वे अधि नो ब्रुवन्तु प्रेमां ँवाचं विश्वामवन्तु विश्वे ।

आशून् हुवे सुयमानूतये ते नो मुञ्चन्त्वेनसः ।

यदिदं माऽभिशोचति पौरुषेयेण दैव्येन ।

स्तौमि विश्वान् देवान् नाथितो जोहवीमि ते नो मुञ्चन्त्वेनसः ।

*अनुनो–ऽद्यानुमतिरन्विदनु मते त्वं ँवैश्वानरो न ऊत्या पृष्टो दिवि ।*

Below is the full text of the concised Mantra given in “italics” above.
This concised Mantra is formed by adding the First word/part from the first part of the First para , 2nd word /part from first part of Second para of Full Mantra which is given below. Add the Underlined words of the Full Mantra to arrive at the above concised Mantra. It is more appropriate to chant the full version as given below. Please refer to your Guru for any clarifications/explanations.

अनुनोऽध्यानुमतिर् यज्ञं देवेषु मन्यतां । अग्निश्च हव्य वाहनो
भवतां दाशुषे मयः ॥ 38

अन्विदनुमते त्वं मन्यासै शंच नः कृधि । क्रत्वे दक्षाय नो हिनु प्रण
आयू॑ꣳषि तारिषः।

वैश्वानरो न ऊत्या ऽऽप्रयातु परावतः । अग्निरुक्थेन वाहसा ।

पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पृष्टो विश्वा ओषधीरा–विवेश ।
वैश्वानर स्सहसा पृष्टो अग्निस्सनो दिवा सरिषः पातु नक्तं ।

ये अप्रथेता ममितेभि रोजोभि र्ये प्रतिष्ठे अभवतां ँवसूनां ।
स्तौमि द्यावा पृथिवी नाथितो जोहवीमि ते नो मुञ्चतमꣳ हसः ।
उर्वी रोदसी वरिवः कृणोतं क्षेत्रस्य पत्नी अधिनो ब्रूयातं ।
स्तौमि द्यावा पृथिवी नाथितो जोहवीमि ते नो मुञ्चतमꣳ हसः ।
यत्ते वयं पुरुषत्राय विष्ठा विद्वाꣳ सश्च कृमा कच्च नागः ॥ 39

कृधी स्वस्मा ऽ अदितेरनागा व्येना ऽसि शिश्रथो विष्वगग्ने ।

यथा ह तद् वसवो गौर्यं चित् पदिषिता ममुञ्चता यजत्राः ।

एवा त्वमस्मत् प्रमुञ्चा व्य ऽहः प्रातार्यग्ने प्रतरान्न आयुः ॥ **40 (15)**

## *1.21 सर्पाहुती मन्त्रा:*

समीची नामासि प्राची दिक्तस्यास्ते ऽग्निरधिपति रसितो रक्षिता

यश्चाधिपति र्यश्च गोप्ता ताभ्यां नमस्तौनो मृडयतां

ते यं द्विष्मो यश्च नो द्वेष्टि तं ँवां जंभे दधाम्यो–,

–जस्विनी नामासि दक्षिणा दिक्तस्यास्त इन्द्रोऽधिपतिः पृदाकुः ,

प्राची नामासि प्रतीची दिक्तस्यास्ते सोमोऽधिपति स्स्वजो ,

ऽवस्थावा नामा–स्युदीची दिक्तस्यास्ते वरुणोऽधिपति–स्तिरश्च राजि,

–रधिपत्नी नामासि बृहती दिक्तस्यास्ते बृहस्पति–रधिपति श्श्वित्रो,

वशिनी नामासी यं दिक्तस्यास्ते यमोऽधिपतिः कल्माष ग्रीवो,

रक्षिता यश्चाधिपतिर् यश्च गोप्ता ताभ्यां नमस्तौ नो मृडयतां

ते यं द्विष्मो यश्च नो द्वेष्टि तं वां जंभे दधामि ॥ **41 (16)**

## *1.22 सर्पाहुती मन्त्राः (अनुषङ्गं)*

समीची नामासि प्राची दिक्तस्यास्ते ऽग्निरधिपति रसितो
रक्षिता–यश्चाधिपति र्यश्च गोप्ता ताभ्यां नमस्तौ नो मृडयतां ते
यं द्विष्मो यश्च नो द्वेष्टि तं वां जंभे दधामि ।

ओजस्विनी नामासि दक्षिणा दिक्तस्यास्त इन्द्रोऽधिपतिः पृदाकू
रक्षितायश्चाधिपति र्यश्च गोप्ता ताभ्यां नमस्तौ नो मृडयतां ते यं
द्विष्मो यश्चनो द्वेष्टि तं वां जंभे दधामि ।

प्राची नामासि प्रतीची दिक्तस्यास्ते सोमोऽधिपति स्स्वजो
रक्षितायश्चाधिपति र्यश्च गोप्ता ताभ्यां नमस्तौ नो मृडयतां ते
यं द्विष्मो यश्च नो द्वेष्टि तं वां जंभे दधामि ।

अवस्थावा नामा–स्युदीची दिक्तस्यास्ते वरुणोऽधिपति–स्तिरश्च
राजी रक्षिता यश्चाधिपति–र्यश्च गोप्ता ताभ्यां नमस्तौ नो मृडयतां
ते यं द्विष्मो यश्च नो द्वेष्टि तं वां जंभे दधामि ।

अधिपत्नी नामासि बृहती दिक्तस्यास्ते बृहस्पति–रधिपतिः श्वित्रो
रक्षिता यश्चाधिपति र्यश्च गोप्ता ताभ्यां नमस्तौ नो मृडयतां ते यं
द्विष्मो यश्च नो द्वेष्टि तं वां जंभे दधामि ।

वशिनी नामासीयं दिक्तस्यास्ते यमोऽधिपतिः कल्माष ग्रीवो रक्षिता
यश्चाधिपति र्यश्च गोप्ता ताभ्यां नमस्तौ नो मृडयतां
ते यं द्विष्मो यश्च नो द्वेष्टि तं वां जंभे दधामि ॥ **41A (16A)**

## *1.23 गन्धर्वाहुतीः*

हेतयो नामस्थ तेषां वः पुरो गृहा अग्निर्व इषव स्सलिलो,
निलिंपा नामस्थ तेषां वो दक्षिणा गृहाः पितरो व इषव स्सगरो,
वज्रिणो नामस्थ तेषां वः पश्चाद्–गृहा स्स्वप्नो व इषवो गह्वरो,

वस्थावानो नामस्थ तेषां ँव उत्तराद् गृहा आपो व इषव स्समुद्रो–,
ऽधिपतयो नामस्थ तेषां ँव उपरि गृहा वर्षं ँव इषवोऽवस्वान्,
क्रव्या नामस्थ पार्थिवा–स्तेषां ँव इह गृहा अन्नं ँव इषवो निमिषो,
वात नामं तेभ्यो वो नमस्ते नो मृडयत ते यं द्विष्मो यश्च नो द्वेष्टि
तं ँवो जंभे दधामि ॥ **42 (17)**

## *1.24 <u>गन्धर्वाहुतीः (अनुषङ्गं)</u>*

हेतयो नामस्थ तेषां ँवः पुरो गृहा अग्निर्व इषव–स्सलिलो
वात नामं तेभ्यो वो नमस्ते नो मृडयत ते यं द्विष्मो यश्च नो द्वेष्टि
तं ँवो जंभे दधामि ।
निलिंपा नामस्थ तेषां ँवो दक्षिणा गृहाः पितरो व इषव–स्सगरो
वात नामं तेभ्यो वो नमस्ते नो मृडयत ते यं द्विष्मो यश्च नो द्वेष्टि
तं ँवो जंभे दधामि ।

वज्रिणो नामस्थ तेषां ँवः पश्चाद्–गृहा स्स्वप्नो व इषवो गह्वरो

वात नामं तेभ्यो वो नमस्ते नो मृडयत ते यं द्विष्मो यश्च नो द्वेष्टि

तं ँवो जंभे दधामि ।

अवस्था वा नो नामस्थ तेषां ँव उत्तराद् गृहा आपो व इषव स्समुद्रो

वात नामं तेभ्यो वो नमस्ते नो मृडयत ते यं द्विष्मो यश्च नो द्वेष्टि

तं ँवो जंभे दधामि ।

अधिपतयो नामस्थ तेषां ँव उपरि गृहा वर्षं व इषवोऽवस्वान्

वात नामं तेभ्यो वो नमस्ते नो मृडयत ते यं द्विष्मो यश्च नो द्वेष्टि

तं ँवो जंभे दधामि ।

क्रव्या नामस्थ पार्थिवा–स्तेषां ँव इह गृहा अन्नं व इषवो निमिषो

वात नामं तेभ्यो वो नमस्ते नो मृडयत ते यं द्विष्मो यश्च नो द्वेष्टि

तं ँवो जंभे दधामि ॥ **42A (17A)**

## 1.25 अज्यानि मन्त्राः

शतायुधाय शतवीर्याय शतोतये ऽभिमातिषाहे ।
शतं यो न श्शरदो अजीता–निन्द्रो नेषदति दुरितानि विश्वा ।
ये चत्वारः पथयो देवयाना अन्तरा द्यावा पृथिवी वियन्ति ।
तेषां यो अज्यानि– मजीति–मावहात्तस्मै नो देवाः परिदत्तेह सर्वे ।
ग्रीष्मो हेमन्त उत नो वसन्त श्शरद् वर्षा स्सुवितन्नो अस्तु ।
तेषा–मृतूना शत शारदाना–न्निवात एषामभये स्याम ।
इदुवथ्सराय परिवथ्सराय संवँथ्सराय कृणुता बृहन्नमः ।
तेषां वय सुमतौ यज्ञियानां ज्योगजीता अहता स्स्याम ।
भद्रान्नः श्रेय स्समनैष्ट देवा स्त्वयाऽवसेन समशी महित्वा ।
सनोमयो भूः पितो आविशस्व शंतोकाय तनुवे स्योनः ॥ **43 (18)**

भूतं भव्यं भविष्यद् वषट् थ्स्वाहा ,
नम ऋख् साम–यजु र्वषट् थ्स्वाहा ,
नमो गायत्री त्रिष्टुप् जगती वषट् थ्स्वाहा ,

नमः पृथिव्यन्तरिक्षं द्यौ र्वषट् थ्स्वाहा ,

नमो ऽग्निर्वायु–स्सूर्यो वषट् थ्स्वाहा ,

नमः प्राणो–व्यानो–ऽपानो वषट् थ्स्वाहा ,

नमोऽन्नं कृषि र्वृष्टि र्वषट् थ्स्वाहा ,

नमः पिता पुत्रः पौत्रो वषट् थ्स्वाहा ,

नमो भूर्भुवस्सुव र्वषट् थ्स्वाहा नमः ॥ **44 (19)**

## *1.26 अथर्वशीर्ष*

इन्द्रो दधीचो अस्तभिः । वृत्राण्य प्रतिष्कुतः । जघान नवतीर्नव ।

इच्छन्न–श्वस्य यच्छिरः । पर्वतेष्व–पश्रितं । तद्विदच्छ र्यणावति ।

अद्राह गोरमन्वत । नाम त्वष्टुर–पीच्यं । इत्था चन्द्रमसो गृहे ।

इन्द्रमिद् गाथिनो बृहत् ॥ **45**

इन्द्र मर्केभि रर्किणः । इन्द्रं वाणीरनूषत । इन्द्र इद्धर्यो स्सचा ।

सं मिश्ल आवचो युजा । इन्द्रो वज्री हिरण्ययः। इन्द्रो दीर्घाय चक्षसे ।

आसूर्य॑ रोहयद् दिवि । विगोभिरद्रि मैरयत् ।

इन्द्र वाजेषु नो अव । सहस्र प्रधनेषु च ॥ **46**

उग्र उग्राभि–रूतिभिः । तमिन्द्रं वा जयामसि । महे वृत्राय हन्तवे ।

स वृषा वृषभो–भुवत् । इन्द्र स्सदा मने कृतः । ओजिष्ठ स्सबले हितः ।

द्युम्नी श्लोकी स सौम्यः । गिरा वज्रो न संभृतः । सबलो अनपच्युतः ।

ववक्षु रुग्रो अस्तृतः ॥ **47 (20)**

## *1.27* ***प्रत्यंगिरसः***

चक्षुषो हेते मनसो हेते । वाचो हेते ब्रह्मणो हेते ।

योमाऽघायुरभि–दासति । तमग्ने मेन्याऽमेनिं कृणु ।

योमा चक्षुषा यो मनसा । यो वाचा ब्रह्मणाऽघायु–रभिदासति ।

तयाऽग्ने त्वं मेन्या । अमुम मेनिं कृणु ।

यत् किञ्चासौ मनसा यच्च वाचा । यज्ञै र्जुहोति यजुषा हविर्भिः ॥ **48**

तन् मृत्यु निर्ऋत्या संविँदानः । पुरा दिष्टा दाहुती रस्यहन्तु ।
यातु धाना निर्ऋति रादुरक्षः । ते अस्यघ्नं त्वनृतेन सत्यं ।
इन्द्रेषिता आज्यमस्य मथ्नन्तु । मातथ् समृद्धि यदसौ करोति ।
हन्मितेऽहं कृतꣳ हविः । यो मे घोरमची कृतः ।
अपाञ्चौ त उभौ बाहू । अपनह्याम्यास्यं ॥ **49**

अपनह्यामिते बाहू । अप नह्याम्यास्यं । अग्ने देवस्य ब्रह्मणा ।
सर्वं ते ऽवधिष्ङ् कृतं । पुराऽमुष्य वषट् कारात् । यज्ञं देवेषु नस्कृधि ।
स्विष्ट–मस्माकं भूयात् । माऽस्मान् प्रापन्नरातयः । अन्तिदूरे सतो अग्ने ।
भ्रातृव्यस्या भिदासतः । वषट् कारेण वज्रेण । कृत्याꣳ हन्मि कृतामहं ।
यो मा नक्तं दिवा सायं । प्रात–श्चाह्नो निपीयति । अद्या–तमिन्द्र वज्रेण ।
भ्रातृव्यं पादयामसि ॥ **50 (21)**

प्राणो रक्षति विश्वमेजत् । इर्यो भूत्वा बहुधा बहूनि ।
स इथ् सर्वँ व्यानशे । यो देवो देवेषु विभूरन्तः ।
आवृदूदात् क्षेत्रियद्ध्वगद् वृषा । तमित् प्राणं मनसोप शिक्षत ।

अग्रं देवाना–मिदमत्तु नो हविः । मनसश्चि–त्तेदं ।
भूतं भव्यं च गुप्यते । तद्धि देवेष्व–ग्रियं ॥ 51

आन एतु पुरश्चरं । सह देवै–रिम७् हवं ।
मनः श्रेयसि श्रेयसि । कर्मन् यज्ञपतिं दधत् ।
जुषतां मे वागिद७् हविः । विराड् देवी पुरोहिता ।
हव्यवाडन–पायिनी । यया रूपाणि बहुधा वदन्ति ।
पेशा७्सि देवाः परमे जनित्रे । सा नो विराडनप स्फुरन्ती ॥ 52

वाग्देवी जुषता मिद७् हविः । चक्षु र्देवानां ज्योतिरमृते न्यक्तं ।
अस्य विज्ञानाय बहुधा निधीयते । तस्य सुम्न–मशीमहि ।
मा नो हासीद् विचक्षणं । आयुरिन्नः प्रतीर्यतां ।
अनन्धा–श्चक्षुषा वयं । जीवा ज्योति–रशीमहि ।
सुव ज्योति–रुतामृतं । श्रोत्रेण भद्र मुत–शृण्वन्ति सत्यं ।
श्रोत्रेण वाचं बहुधो–द्यमानां । श्रोत्रेण मोदश्च महश्च श्रूयते ।

श्रोत्रेण सर्वा दिश आशृणोमि । येन प्राच्या उत दक्षिणा ।
प्रतीच्यै दिशः शृण्वन्त्युत्तरात् । तदिच्छ्रोत्रं बहुधोद्यमानं ।
अरान्न नेमिः परिसर्वं बभूव ॥ **53 (22)**

सिꣳहे व्याघ्र उत या पृदाकौ । त्विषि–रग्नौ ब्राह्मणे सूर्येया ।
इन्द्रं ꣳया देवी सुभगा जजान । सा न आगन् वर्चसा संविदाना ।
या राजन्ये दुन्दु–भावायतायां । अश्वस्य क्रंद्ये पुरुषस्य मायौ ।
इन्द्रं ꣳया देवी सुभगा जजान । सा न आगन् वर्चसा सँविदाना ।
या हस्तिनि द्वीपिनि या हिरण्ये । त्विषि–रश्वेषु पुरुषेषु गोषु ॥ **54**

इन्द्रं ꣳया देवी सुभगा जजान । सा न आगन् वर्चसा सँविदाना ।
रथे अक्षेषु वृषभस्य वाजे । वाते पर्जन्ये वरुणस्य शुष्मे ।
इन्द्रं ꣳया देवी सुभगा जजान । सा न आगन् वर्चसा सँविदाना ।
राडसि विराडसि । सम्राडसि स्वराडसि ।
इन्द्राय त्वा तेजस्वते तेजस्वन्तꣳ श्रीणामि ।
इन्द्राय त्वौजस्वत ओजस्वन्तꣳ श्रीणामि ॥ **55**

इन्द्राय त्वा पयस्वते पयस्वन्त७ श्रीणामि ।

इन्द्राय त्वाऽऽयुष्मत आयुष्मन्त७ श्रीणामि ।

तेजोऽसि । तत्ते प्रयच्छामि । तेजस्वदस्तु मे मुखं ।

तेजस्वच्छिरो अस्तु मे । तेजस्वान् विश्वतः प्रत्यङ् ।

तेजसा सं पिपृग्धिमा । ओजोऽसि । तत्ते प्रयच्छामि ॥ **56**

ओजस्वदस्तु मे मुखं । ओजस्वच्छिरो अस्तु मे ।

ओजस्वान् विश्वतः प्रत्यङ् । ओजसा संपिपृग्धि मा । पयोऽसि ।

तत्ते प्रयच्छामि । पयस्वदस्तु मे मुखं । पयस्वच्छिरो अस्तु मे ।

पयस्वान् विश्वतः प्रत्यङ् । पयसा संपिपृग्धि मा ॥ **57**

आयुरसि । तत्ते प्रयच्छामि । आयुष्मदस्तु मे मुखं ।

आयुष्मच्छिरो अस्तु मे । आयुष्मान् विश्वतः प्रत्यङ् ।

आयुषा संपिपृग्धि मा । इम मग्न आयुषे वर्चसे कृधि ।

प्रियꣳ रेतो वरुण सोम राजन् । मा ते वास्मा अदिते शर्म यच्छ ।
विश्वे देवा जरदष्टि यथाऽसत् ॥ **58**

आयुरसि विश्वायुरसि । सर्वायुरसि सर्वमायुरसि । यतो वातो मनोजवाः ।
यतः क्षरन्ति सिन्धवः । तासां त्वा सर्वासाꣳ रुचा ।
अभिषिञ्चामि वर्चसा । समुद्र इवासि गह्मना । सोम इवास्यदाभ्यः ।
अग्निरिव विश्वतः प्रत्यङ् । सूर्य इव ज्योतिषा विभूः ॥ **59**

अपां ँयो द्रवणे रसः । तमहमस्मा आमुष्यायणाय ।
तेजसे ब्रह्मवर्चसाय गृह्णामि । अपां ँय ऊर्मौ रसः ।
तमहमस्मा आमुष्यायणाय । ओजसे वीर्याय गृह्णामि ।
अपां ँयो मद्ध्यतो रसः । तमहमस्मा आमुष्यायणाय ।
पुष्टै प्रजननाय गृह्णामि । अपां ँयो यज्ञियो रसः ।
तमहमस्मा आमुष्यायणाय । आयुषे दीर्घायुत्वाय गृह्णामि ॥ **60 (23)**

## *1.28 अन्न सूक्तं*

अहमस्मि प्रथमजा ऋतस्य । पूर्वं देवेभ्यो अमृतस्य नाभिः ।
यो मा ददाति स इ देव मा वाः । अहमन्न मन्न मदन्तमद्मि ।
पूर्व–मग्नेरपि दहत्यन्नं । यत्तौ हासाते अहमुत्तरेषु ।
व्यात्तमस्य पशव–स्सुजंभं । पश्यन्ति धीराः प्रचरन्ति पाकाः ।
जहाम्यन्यं न जहाम्यन्यं । अहमन्नं ँवशमिच्चरामि ॥ **61**

समानमर्थं पर्येमि भुंजत् । को मा मन्नं मनुष्यो दयेत ।
पराके अन्नं निहितं ँल्लोक एतत् । विश्वै र्देवैः पितृभि र्गुप्तमन्नं ।
यदद्यते लुप्यते यत् परोप्यते । शत–तमीसा तनूर्मे बभूव ।
महान्तौ चरू सकृद् दुग्धेन पप्रौ । दिवञ्च पृश्ञि पृथिवीं च साकं ।
तथ्सं–पिबन्तो नमिनन्ति वेधसः । नैतद्भूयो भवति नो कनीयः ॥ **62**

अन्नं प्राणमन्न मपान–माहुः । अन्नं मृत्युं तमु जीवातु माहुः ।
अन्नं ब्रह्माणो जरसं ँवदन्ति । अन्नमाहुः प्रजननं प्रजानां ।
मोघ–मन्नं विन्दते अप्रचेताः । सत्यं ब्रवीमि वध इथ्स तस्य ।

नार्यमणं पुष्यति नो सखायं । केवलाघो भवति केवलादी ।
अहं मेघ स्स्तनयन् वर्षन्नस्मि । मामदन्त्य–हमद्म्यन्यान् ॥ 63
अहऀ सदमृतो भवामि । मदादित्या अधि सर्वे तपन्ति ।

## *1.29 वाख् सूक्तं*

*देवीं वाचम जनयन्त यद् वाग्वदन्ति ।*

Below is the full text of the concised Mantra given in “italics” above.
This concised Mantra is formed by adding the First word/part from the first part of the First para , 2nd word /part from first part of Second para of Full Mantra which is given below. Add the Underlined words of the Full Mantra to arrive at the above concised Mantra. It is more appropriate to chant the full version as given below. Please refer to your Guru for any clarifications/explanations.

देवीं वाचम जनयन्त देवाः । तां विश्वरूपाः पशवो वदन्ति ।
सा नो मन्द्रेष मूर्जं दुहाना । धेनुर्वागस्मा–नुपसुष्टुतैतु ।

यद् वाग्वदन्त्य विचेतनानि । राष्ट्री देवानां निषसाद मन्द्रा ।
चतस्र ऊर्जं दुदुहे पयाऀसि । क्वस्वि दस्याः परमं जगाम ॥ 64

अनन्ता–मन्तादधि निर्मितां महीं । यस्यां देवा अदधु र्भोजनानि ।
एकाक्षरां द्विपदा॒ꣳ षट्पदाञ्च । वाचं देवा उपजीवन्ति विश्वे ।
वाचं देवा उपजीवन्ति विश्वे । वाचं गन्धर्वाः पशवो मनुष्याः ।
वाचीमा विश्वा भुवना–न्यर्पिता । सा नो हवं जुषता–मिन्द्र पत्नी ।
वागक्षरं प्रथमजा ऋतस्य । वेदानां माता–ऽमृतस्य नाभिः ॥ **65**

सा नो जुषाणोप यज्ञ मागात् । अवन्ती देवी सुहवा मे अस्तु ।
या मृषयो मन्त्र कृतो मनीषिणः । अन्वैच्छन् देवा–स्तपसा श्रमेण ।
तां देवीं ँवाचꣳ हविषा यजामहे । सा नो दधातु सुकृतस्य लोके ।
चत्वारि वाक् परिमिता पदानि । तानि विदु र्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेङ्गयन्ति । तुरीयं ँवाचो मनुष्या वदन्ति ॥ **66**

## *1.30 श्रद्धा सूक्तं*

श्रद्धयाऽग्नि स्समिध्यते । श्रद्धया विन्दते हविः । श्रद्धां भगस्य मूर्धनि ।
वचसा वेदयामसि । प्रिय७ श्रद्धे ददतः । प्रिय७ श्रद्धे दिदासतः ।
प्रियं भोजेषु यज्वसु । इदं म उदितं कृधि ।
यथा देवा असुरेषु । श्रद्धा मुग्रेषु चक्रिरे ॥ **67**

एवं भोजेषु यज्वसु । अस्माक–मुदितं कृधि । श्रद्धां देवा यजमानाः ।
वायु–गोपा उपासते । श्रद्धा७ हृदय्यया–ऽऽकूत्या । श्रद्धया हूयते हविः ।
श्रद्धां प्रात र्हवामहे । श्रद्धां मद्ध्यन्दिनं परि । श्रद्धा७ सूर्यस्य निम्रुचि ।
श्रद्धे श्रद्धापये हमा ॥ **68**

श्रद्धा देवान–धिवस्ते । श्रद्धा विश्व मिदं जगत् ।
श्रद्धां कामस्य मातरं । हविषा वर्द्धयामसि ।

## *1.31 ब्रह्म सूक्तं*

ब्रह्मजज्ञानं प्रथमं पुरस्तात् । विसीमत–स्सुरुचो वेन आवः ।
स बुद्ध्नया उपमा अस्य विष्ठाः । सतश्च योनि–मसतश्च विवः ॥
पिता–विराजा मृषभो–रयीणां । अन्तरिक्षं ँविश्वरूप आविवेश ॥ 69

तमर्कैरभ्यर्च्चन्ति वथ्सं । ब्रह्म सन्तं ब्रह्मणा वर्द्धयन्तः ॥
ब्रह्म देवानजनयत् । ब्रह्म विश्वमिदं जगत् ॥
ब्रह्मणः क्षत्रं निर्मितं । ब्रह्म ब्राह्मण आत्मना ॥
अन्तरस्मि–न्निमे लोकाः । अन्त र्विश्वमिदं जगत् ।
ब्रह्मैव भूतानां ज्येष्ठं । तेन कोऽर्हति स्पर्द्धितुं ॥ 70

ब्रह्मं देवा–स्त्रयस्त्रि९्शत् । ब्रह्म–न्निन्द्र प्रजापती ।
ब्रह्मन् हविश्चा भूतानि । नावी वान्त–स्समाहिता ॥
चतस्र आशाः प्रचरन्त्व–ग्नयः । इमन्नो यज्ञन्नयतु प्रजानन् ।
घृतं पिन्वन्न जर९् सुवीरं । ब्रह्म समिद् भवत्याहुतीनां ॥

## *1.32 गो सूक्तं*

आगावो अग्मन्नुत भद्र–मक्रन् । सीदन्तु गोष्ठे–रणयन्त्वस्मे ॥ **71**

प्रजावतीः पुरु रूपा इह स्युः । इन्द्राय पूर्वी रुषसो दुहानाः ।

इन्द्रो यज्वने पृणते च शिक्षति । उपेद्ददाति न स्वं मुषायति ।

भूयो भूयो रयिमिदस्य वर्द्धयन् । अभिन्ने खिल्ले निदधाति देवयुं ।

*न ता नशन्ति न ता अर्वा ।*

Below is the full text of the concised Mantra given in “italics” above.
This concised Mantra is formed by adding the First word/part from the first part of the First para , 2nd word /part from first part of Second para of Full Mantra which is given below. Add the Underlined words of the Full Mantra to arrive at the above concised Mantra. It is more appropriate to chant the full version as given below. Please refer to your Guru for any clarifications/explanations.

न ता नशन्ति नदभाति तस्करः । नैना अमित्रो व्यथिरा दधर्षति ।

देवाँश्च याभि र्यजते ददाति च ।

ज्योगित्ताभि स्सचते गोपति स्सह ॥ **72**

न ता अर्वा रेणु ककाटो अश्नुते ।

न सँ स्कृतत्र–मुपयन्ति ता अभि ।

उरुगायमभयं तस्य ता अनु ।
गावो मर्त्यस्य विचरन्ति यज्वनः ।

गावो भगो गाव इन्द्रो मे अच्छात् । गाव स्सोमस्य प्रथमस्य भक्षः ।
इमा या गाव–स्सजनास इन्द्रः । इच्छामी–द्धृदा मनसा–चिदिन्द्रं ।
यूयं गावो मेदयथा कृशञ्चित् । अश्लीलं चित् कृणुथा सुप्रतीकं ॥ **73**

भद्रं गृहं कृणुथ भद्र वाचः । बृहद्वो वय उच्यते सभासु ।
प्रजावती स्सूयवस७्–रिशन्तीः । शुद्धा अप स्सुप्रपाणे पिबन्तीः ।
माव स्तेन ईशत माघश७्सः । परिवो हेती रुद्रस्य वृंज्यात् ।
उपेद–मुप–पर्चनं । आसु गोषूप पृच्यतां । उपर्षभस्य रेतसि ।
उपेन्द्र तव वीर्ये ॥ **74 (24)**

## *1.33 सूर्या चन्द्रमसा सूक्तं*

ता सूर्या चन्द्रमसा विश्व–भृत्तमा महत् । तेजो वसुमद्राजतो दिवि ।
सामात्माना चरत स्साम–चारिणा । ययोर्व्रतं नममे जातु देवयोः ।
उभावन्तौ परियात अर्म्या । दिवो न रश्मी॰ स्तनुतो–व्यर्णवे ।
उभा भुवन्ती भुवना कविक्रतू । सूर्या न चन्द्रा चरतो हतामती ।
पतीद्युमद् विश्व–विदा उभा दिवः । सूर्या उभा चन्द्रमसा विचक्षणा ॥ **75**

विश्ववारा वरिवो भा वरेण्या । ता नोऽवतं मतिमन्ता महिव्रता ।
विश्व वपरी प्रतरणा तरन्ता । सुवर्विदा दृशये भूरि रश्मी ।
सूर्या हि चन्द्रा वसुत्वेष–दर्शता । मनस्विनो ऽभानुचरतोनु–संदिवं ।
अस्य श्रवो नद्य स्सप्त बिभ्रति । द्यावा क्षामा पृथिवी दर्शतं वपुः ।
अस्मे सूर्या चन्द्रमसा–ऽभिचक्षे । श्रद्धेक–मिन्द्र चरतो विचर्तुरं ॥ **76**
पूर्वापरं चरतो माय यैतौ । शिशू क्रीडन्तौ परियातो अध्वरं ।
विश्वान्यन्यो भुवना ऽभिचष्टे । ऋतूनन्यो विदधज्जायते पुनः ।

*हिरण्यवर्णाः शुचयः पावका यासा॒ राजा ।*

*यासां देवा श्शिवेन मा चक्षुषा पश्यत ।*

*आपो भद्रा आदित्पश्यामि ।*

Below is the full text of the concised Mantra given in “italics” above.
This concised Mantra is formed by adding the First word/part from the first part of the First para , 2nd word /part from first part of Second para and so on. Add the Underlined words of the Full Mantra to arrive at the above concised Mantra. It is more appropriate to chant the full version as given below.
Please refer to your Guru for any clarifications/explanations.

हिरण्यवर्णाः शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः।
अग्निंयाँ गर्भं दधिरे विरूपास्ता न आपश्शꣳ स्योना भवन्तु ॥

यासा॒ राजा वरुणो याति मध्ये सत्यानृते अवपश्यं जनानां ।
मधुश्चुत–श्शुचयो याः पावकास्ता न आपश्शꣳ स्योना भवन्तु ॥

यासां देवा दिवि कृण्वन्ति भक्षय्या अन्तरिक्षे बहुधा भवन्ति ।
याः पृथिवीं पयसोन्दन्ति शुक्रास्ता न आपश्शꣳ स्योना भवन्तु ॥ 77

शिवेन मा चक्षुषा पश्यताप श्शिवया तनुवोप स्पृशत त्वचं मे ।
सर्वा॒ अग्नी॒ रफ्सुषदो हुवे वो मयि वर्चो बलमोजो निधत्त ॥

आपो भद्रा घृतमिदाप आसु रग्नीषो मौ बिभ्रत्याप इत्ताः ।
तीव्रो रसो मधुपृचा-मरङ्गम आमा प्राणेन सहवर्च सागन्न् ।

आदित्पश्या म्युतवा शृणोम्यामा घोषो गच्छति वाङ्न आसां ।
मन्ये भेजानो अमृतस्य तर्हि हिरण्यवर्णा अतृपं ँयदा वः ।

## 1.34 नासदासीय सूक्तं

नासदासीन्नो सदासीत्तदानीं । नासीद्रजो नो व्योमा-परोयत् ।
किमा वरीवः कुहकस्य शर्मन्न् । अंभः किमासीद्-गहनं गभीरं ॥ 78

न मृत्यु-रमृतं तर्हि न । रात्रिया अह्न आसीत् प्रकेतः ।
आनीद वातॅ स्वधया तदेकं । तस्माद्धान्य न परः किंचनास ।
तम आसी-त्तमसा गूढमग्रे प्रकेतं । सलिलॅ सर्व मा इदं ।
तुच्छे नाभ्वपिहितं ँयदासीत् । तमसस् तन्महिना जायतैकं ।
कामस्तदग्रे समवर्त्तताधि । मनसो रेतः प्रथमं यदासीत् ॥ 79

स तो बन्धुमसति निरविन्दन्न् । हृदि–प्रतीष्या कवयो मनीषा ।
तिरश्चीनो विततो रश्मि–रेषां । अधस्विदासी(३) दुपरिस्विदासी(३)त् ।
रेतोधा आसन् महिमान आसन्न् । स्वधा अवस्तात् प्रयतिः परस्तात् ।
को अद्धा वेदक इह प्रवोचत् । कुत आजाता कुत इयं ँविसृष्टिः ।
अर्वाग् देवा अस्य विसर्जनाय । अथा को वेद यत आ बभूव ॥ **80**

इयं ँविसृष्टि र्यत आबभूव । यदि वा दधे यदि वा न ।
यो अस्याद्ध्यक्षः परमे व्योमन्न् । सो अङ्गवेद यदि वा न वेद ।
कि७स्विद्वनं क उस वृक्ष आसीत् । यतो द्यावा पृथिवी निष्टतक्षुः ।
मनीषिणो मनसा पृच्छते दुतत् । यदद्ध्यतिष्ठद् भुवनानि धारयन्न् ।
ब्रह्मवनं ब्रह्म स वृक्ष आसीत् । यतो द्यावा पृथिवी निष्टतक्षुः ॥ **81**
मनीषिणो मनसा विब्रवीमि वः । ब्रह्माद्ध्यतिष्ठद् भुवनानि धारयन्न् ।

## *1.35 भाग्य सूक्तं*

प्रातरग्निं प्रातरिन्द्र७् हवामहे । प्रात र्मित्रा वरुणा प्रातरश्विना ।
प्रात र्भगं पूषणं ब्रह्मणस्पतिं । प्रातस्सोम मुत रुद्र७् हुवेम ॥

प्रातर्जितं भगमुग्र॒ हुवेम । वयं पुत्रमदितेर्यो विधर्त्ता ।
आध्रश्चिद्यं मन्यमान–स्तुरश्चित् । राजा चिद्यं भगं भक्षीत्याह ॥ 82

भगप्रणेत–र्भगसत्यराधः । भगेमां धियमुद–वददन्नः ।
भगप्रणो जनय गोभिरश्वैः । भग प्रनृभि र्नृवन्तस्स्याम ॥
उतेदानीं भगवन्तस्स्याम । उत प्रपित्व उत मद्ध्ये अह्नां ।
उतोदिता मघवन्थ्–सूर्यस्य । वयं देवाना॒ सुमतौ स्याम ॥
भगएव भगवा॒ अस्तु देवाः । तेन वयं भगवन्त स्स्याम । 83

तन्त्वा भग सर्व इज्जोहवीमि । सनो भग पुर एता भवेह ॥
समध्वरा–योषसोऽनमन्त । दधिक्रावेव शुचये पदाय ।
अर्वाचीनं ँवसुविदं भगन्नः । रथमिवाश्वा वाजिन आवहन्तु ॥
अश्वावती र्गोमती र्न उषासः । वीरवती–स्सदमुच्छन्तु भद्राः ।
घृतं दुहाना विश्वतः प्रपीनाः । यूयं पात स्वस्ति–भिस्सदानः ॥ 84 (25)

## 1.36 नक्षत्र सूक्तं(वाक्यं)

**1.नक्षत्रं – कृत्तिका                                        देवता – अग्निः**

अग्निर्नः पातु कृत्तिकाः । नक्षत्रं देवमिन्द्रियं । इदमासां–ँविचक्षणं ।

हविरासं जुहोतन । यस्य भान्ति रश्मयो यस्य केतवः ।

यस्येमा विश्वा भुवनानि सर्वा । स कृत्तिका भिरभि–सँवसानः ।

अग्निर्नो देवस्सुविते दधातु ॥ 1

**2. नक्षत्रं – रोहिणी                                        देवता – प्रजापतिः**

प्रजापते रोहिणी वेतु पत्नी । विश्वरूपा बृहती चित्रभानुः । 85

सा नो यज्ञस्य सुविते दधातु । यथा जीवेम शरदस्सवीराः ।

रोहिणी देव्युदगात् पुरस्तात् । विश्वा रूपाणि प्रतिमोदमाना ।

प्रजापतिं॒ हविषा वर्धयन्ती । प्रिया देवाना–मुपयातु यज्ञं ॥ 2

**3.नक्षत्रं – मृगशीर्षः                                        देवता – सोमः**

सोमो राजा मृगशीर्षेण आगन्न् । शिवं नक्षत्रं प्रियमस्य धाम ।

आप्यायमानो बहुधा जनेषु । रेतः प्रजां ँयजमाने दधातु । 86

यत्ते नक्षत्रं मृगशीर्षमस्ति । प्रियᳪ राजन् प्रियतमं प्रियाणां ।
तस्मै ते सोम हविषा विधेम । शन्न एधि द्विपदे शंचतुष्पदे ॥ 3

**4. नक्षत्रं – आर्द्रा** **देवता – रुद्रः**

आर्द्रया रुद्रः प्रथमा न एति । श्रेष्ठो देवानां पतिरघ्नियानां ।
नक्षत्रमस्य हविषा विधेम । मा नः प्रजाᳪ रीरिषन् मोत वीरान् ।
हेती रुद्रस्य परिणो वृणक्तु । आर्द्रा नक्षत्रं जुषताᳪ हविर्नः । 87
प्रमुञ्चमानौ दुरितानि विश्वा । अपाघशᳪ सन्नु–दतामरातिं ॥ 4

**5.नक्षत्रं – पुनर्वसु** **देवता – अदितिः**

पुनर्नो देव्यदिति–स्पृणोतु । पुनर्वसू नः पुनरेतां यज्ञं ।
पुनर्नो देवा अभियन्तु सर्वे । पुनः पुनर्वो हविषा यजामः ।
एवा न देव्य–दितिर–नर्वा । विश्वस्य भर्त्री जगतः प्रतिष्ठा ।
पुनर्वसू हविषा वर्धयन्ती । प्रियं देवाना–मप्येतु पाथः ॥ 5 (88)

**6.नक्षत्रं – पुष्यः** देवता – बृहस्पतिः

बृहस्पतिः प्रथमञ्जायमानः । तिष्यं नक्षत्रमभि संबभूव ।
श्रेष्ठो देवानां पृतनासु जिष्णुः । दिशो नु सर्वा अभयन्नो अस्तु ।
तिष्यः पुरस्तादुत मध्यतो नः । बृहस्पति र्नः परिपातु पश्चात् ।
बाधे तान् द्वेषो अभयं कृणुतां । सुवीर्यस्य पतयस्याम ॥ 6

**7. नक्षत्रं –आश्रेषं** देवता – सर्पाः

इद७ सर्पेभ्यो हविरस्तु जुष्टं । आश्रेषा येषा मनुयन्ति चेतः । 89
ये अन्तरिक्षं पृथिवीं–क्षियन्ति । तेन स्सर्पासो हवमागमिष्ठाः ।
ये रोचने सूर्यस्यापि सर्पाः । ये दिवं देवीमनु–सञ्चरन्ति ।
येषामाश्रेषा अनुयन्ति कामं । तेभ्य–स्सर्पेभ्यो मधु–मज्जुहोमि ॥ 7

**8.नक्षत्रं – मघा** देवता – पितरः

उपहूताः पितरो ये मघासु । मनोजवस–स्सुकृत–स्सुकृत्याः ।
ते नो नक्षत्रे हवमागमिष्ठाः । स्वधाभि र्यज्ञं प्रयतं जुषन्तां । 90

ये अग्निदग्धा येऽनग्नि–दग्धाः । येऽमुल्लोकं पितरः क्षियन्ति ।

याꣳश्च विद्मयाꣳ उ च न प्रविद्म । मघासु यज्ञꣳ सुकृतं जुषन्तां ॥ 8

## 9.नक्षत्रं – पूर्वफल्गुनी देवता – अर्यमा

गवां पतिः फल्गुनी–नामसि त्वं । तद र्यमन् वरुण मित्र चारु ।

तंत्वा वयꣳ सनितारꣳ सनीनां । जीवा जीवन्तमुप सँविशेम ।

येनेमा विश्वा भुवनानि सञ्जिता । यस्य देवा अनुसँय्यन्ति चेतः । 91

अर्यमा राजाऽजरस्तु विष्मान् । फल्गुनीना–मृषभो रोरवीति ॥ 9

## 10.नक्षत्रं – उत्तर फल्गुनी देवता – भगः

श्रेष्ठो देवानां भगवो भगासि । तत्त्वा विदुः फल्गुनी–स्तस्य वित्तात् ।

अस्मभ्यं–क्षत्रमजरꣳ सुवीर्यं । गोमदश्व–वदुपसन्नु–देह ।

भगोह दाता भग इत्प्रदाता । भगो देवीः फल्गुनी–राविवेश ।

भगस्येत्तं प्रसवं गमेम । यत्र देवै–स्सधमादं मदेम । ॥ 10/ 92

**11.नक्षत्रं – हस्तः** **देवता – सविता**

आयातु देव–स्सवितो पयातु । हिरण्ययेन सुवृता रथेन ।
वहन् हस्त॰ सुभगं विद्मनापसं । प्रयच्छन्तं पपुरिं पुण्यमच्छ ।
हस्तः प्रयच्छ त्वमृतं वसीयः । दक्षिणेन प्रतिगृभ्णीम एनत् ।
दातार–मद्य सविता विदेय । यो नो हस्ताय प्रसुवाति यज्ञं ॥ **11**

**12. नक्षत्रं – चित्रा** **देवता – त्वष्टा**

त्वष्टा नक्षत्र–मभ्येति चित्रां । सुभ॰ ससं–ँयुवति॰ रोचमानां । **93**
निवेशयन्न–मृतान् मर्त्या॰श्च । रूपाणि पि॰शन् भुवनानि विश्वा ।
तन्नस्त्वष्टा तदु चित्रा विचष्टां । तन्नक्षत्रं भूरिदा अस्तु मह्यं ।
तन्नः प्रजां ँवीरवती॰ सनोतु । गोभिर्नो अश्वै–स्समनक्तु यज्ञं ॥ **12**

**13.नक्षत्रं – स्वाती** **देवता – वायुः**

वायु र्नक्षत्र–मभ्येति निष्ट्यां । तिग्मशृंगो वृषभो रोरुवाणः ।
समीरयन् भुवना मातरिश्वा । अप द्वेषा॰सि नुद–तामरातीः । **94**

तन्नो वायस्तदु निष्ट्या श्रृणोतु । तन्नक्षत्रं भूरिदा अस्तु मह्यं ।
तन्नो देवासो अनु जानन्तु कामं । यथा तरेम दुरितानि विश्वा ॥ 13

**14.नक्षत्रं – विशाखा देवता – इन्द्राग्नीः**

दूरम–स्मच्छत्रवो यन्तु भीताः । तदिन्द्राग्नी कृणुतां तद् विशाखे ।
तन्नो देवा अनुमदन्तु यज्ञं । पश्चात् पुरस्ता–दभयन्नो अस्तु ।
नक्षत्राणा–मधिपत्नी विशाखे । श्रेष्ठा–विन्द्राग्नी भुवनस्य गोपौ । 95
विषूच–श्शत्रूनप–बाधमानौ । अपक्षुध–न्नुदतामरातिं । ॥ 14

**15. पौर्णमासि**

पूर्णा पश्चादुत पूर्णा पुरस्तात् । उन्मध्यतः पौर्णमासी जिगाय ।
तस्यां देवा अधि सँवसन्तः । उत्तमे नाक इह मादयन्तां ।
पृथ्वी सुवर्चा युवति–स्सजोषाः । पौर्णमास्युदगा–च्छोभमाना ।
आप्याय–यन्ती दुरितानि विश्वा । उरुं दुहां यँजमानाय यज्ञं ॥ 15/96 (26)

**16.नक्षत्रं – अनूराधा** देवता – मित्रः

ऋद्ध्यास्म हव्यै र्नमसोप–सद्य । मित्रं देवं मित्रधेयन्नो अस्तु ।
अनूराधान् हविषा वर्द्धयन्तः । शतं जीवेम शरदस्सवीराः ।
चित्रं–नक्षत्र–मुदगात् पुरस्तात् । अनूराधा स इति यद् वदन्ति ।
तन्मित्र एति पथिभि र्देवयानैः । हिरण्ययै र्वितते–रन्तरिक्षे ॥ **16**

**17.नक्षत्रं – ज्येष्ठा** देवता – इन्द्रः

इन्द्रो ज्येष्ठा मनु नक्षत्रमेति । यस्मिन् वृत्रं वृत्र तूर्ये ततार । **97**
तस्मिन् वय–ममृतं दुहानाः । क्षुधन्तरेम दुरितिं दुरिष्टिं ।
पुरन्दराय वृषभाय धृष्णवे । अषाढाय सहमानाय मीढुषे ।
इन्द्राय ज्येष्ठा मधुमद्दुहाना । उरुं कृणोतु यजमानाय लोकं ॥ **17**

**18.नक्षत्रं – मूलं** देवता – प्रजापतिः

मूलं प्रजां वीरवतीं विदेय । पराच्येतु निरृतिः पराचा ।
गोभि र्नक्षत्रं पशुभि–स्समक्तं । अह र्भूयाद् यजमानाय मह्यं । **98**

अहर्नो अद्य सुवितेे दधातु । मूलं नक्षत्रमिति यद् वदन्ति ।
पराचीं ँवाचा निरृतिं नुदामि । शिवं प्रजायै शिवमस्तु मह्यं ॥ **18**

**19.**नक्षत्रं – पूर्वाषाढा देवता – आपः

या दिव्या आपः पयसा संबभूवुः । या अन्तरिक्ष उत पार्थिवीर्याः ।
यासामषाढा अनुयन्ति कामं । ता न आपः शꣳ स्योना भवन्तु ।
याश्च कूप्या याश्च नाद्या–स्समुद्रियाः । याश्च वैशन्तीरुत प्रासचीर्याः । **99**
यासामषाढा मधु भक्षयन्ति । ता न आपः शꣳ स्योना भवन्तु ॥ **19**

**20.**नक्षत्रं – उत्तराषाढा देवता – विश्वेदेवाः

तन्नो विश्वे उप शृण्वन्तु देवाः । तदषाढा अभिसं ँयन्तु यज्ञं ।
तन्नक्षत्रं प्रथतां पशुभ्यः । कृषि र्वृष्टि र्यजमानाय कल्पतां ।
शुभ्राः कन्या युवतय–स्सुपेशसः । कर्मकृत–स्सुकृतो वीर्यावतीः ।
विश्वान् देवान् हविषा वर्द्धयन्तीः । अषाढाः काम मुपयान्तु यज्ञं ॥ **20/100**

**<u>21.नक्षत्रं – अभिजिद्</u>** **<u>देवता – ब्रह्मा</u>**

यस्मिन् ब्रह्माऽभ्यजयथ् सर्वमेतत् । अमुञ्च लोक मिदमूच सर्वं।
तन्नो नक्षत्र–मभिजिद् विजित्य । श्रियं दधात्व–हृणीयमानं ।
उभौ लोकौ ब्रह्मणा सञ्जितेमौ । तन्नो नक्षत्र–मभिजिद् विचष्टां ।
तस्मिन् वयं पृतनास्सं जयेम । तन्नो देवासो अनुजानन्तु कामं ॥ **21**

**<u>22.नक्षत्रं – श्रवणं</u>** **<u>देवता – विष्णुः</u>**

शृण्वन्ति श्रोणा–ममृतस्य गोपां । पुण्यामस्या उपशृणोमि वाचं । **101**
महीं देवीं ँविष्णुपत्नी मजूर्यां । प्रतीची मेना७ हविषा यजामः ।
त्रेधा विष्णु–रुरुगायो विचक्रमे । महीं दिवं पृथिवी–मन्तरिक्षं ।
तच्छ्रोणैति श्रव–इच्छमाना । पुण्य७ श्लोकं ँयजमानाय कृण्वती ॥ **22**

**<u>23.नक्षत्रं – श्रविष्ठा</u>** **<u>देवता – वसवः</u>**

अष्टौ देवा वसवस्सोम्यासः । चतस्रो देवी रजराः श्रविष्ठाः ।
ते यज्ञं पान्तु रजसः परस्तात् । संवँथ्सरीण–ममृत७ स्वस्ति । **102**

यज्ञं नः पान्तु वसवः पुरस्तात् । दक्षिणतो–ऽभियन्तु श्रविष्ठाः ।
पुण्यन्नक्षत्रमभि सँविशाम । मा नो अराति–रघश७ँ सागन्न् ॥ 23

**24.नक्षत्रं – शतभिषक्** **देवता – वरुणः**

क्षत्रस्य राजा वरुणोऽधिराजः । नक्षत्राणा७ँ शतभिषग् वसिष्ठः ।
तौ देवेभ्यः कृणुतो दीर्घमायुः । शत७ँ सहस्रा भेषजानि धत्तः ।
यज्ञन्नो राजा वरुण उपयातु । तन्नो विश्वे अभिसँय्यन्तु देवाः । 103
तन्नो नक्षत्र७ँ शतभिषग् जुषाणं । दीर्घमायुः प्रतिरद् भेषजानि ॥ 24

**25.नक्षत्रं – पूर्वप्रोष्ठपदा** **देवता – अजयेकपादः**

अज एकपा- दुदगात् पुरस्तात् । विश्वा भूतानि प्रति मोदमानः ।
तस्य देवाः प्रसवं यँन्ति सर्वे । प्रोष्ठपदासो अमृतस्य गोपाः ।
विभ्राजमान–स्समिधा न उग्रः । आऽन्तरिक्ष–मरुहद–गन्द्यां ।
त७ँ सूर्यं देव–मजमेकपादं । प्रोष्ठपदासो अनुयन्ति सर्वे ॥ 25 / 104

**26.नक्षत्रं – उत्तरप्रोष्ठपदा** **देवता – अहिर्बुद्ध्नियः**

अहि बुर्द्ध्नियः प्रथमान एति । श्रेष्ठो देवानामुत मानुषाणां ।
तं ब्राह्मणा–स्सोमपा–स्सोम्यासः । प्रोष्ठपदासो अभिरक्षन्ति सर्वे ।
चत्वार एकमभि कर्म देवाः । प्रोष्ठपदास इति यान् वदन्ति ।
ते बुद्धनियं परिषद्य॒ᳪ स्तुवन्तः । अहि॒ᳪ रक्षन्ति नमसोप सद्य ॥ **26**

**27.नक्षत्रं – रेवती** **देवता – पूषा**

पूषा रेवत्यन्वेति पन्थां । पुष्टिपती पशुपा वाजबस्त्यौ । 105
इमानि हव्या प्रयता जुषाणा । सुगैर्नो यानैरुपयातां ँयज्ञं ।
क्षुद्रान् पशून् रक्षतु रेवती नः । गावो नो अश्वा॒ᳪ अन्वेतु पूषा ।
अन्न॒ᳪ रक्षन्तौ बहुधा विरूपं । वाज॒ᳪ सनुतां ँयजमानाय यज्ञं ॥ **27**

**28 नक्षत्रं – अश्विनी** **देवता – अश्विनी देवौ**

तदश्विना–वश्वयुजो–पयातां । शुभङ्गमिष्ठौ सुयमेभिरश्वैः ।
स्वन्नक्षत्र॒ᳪ हविषा यजन्तौ । मध्वा–संपृक्तौ यजुषा समक्तौ । **106**

यौ देवानां भिषजौ हव्यवाहौ । विश्वस्य दूता–वमृतस्य गोपौ ।
तौ नक्षत्रं–जुजुषाणो–पयातां । नमोऽश्विभ्यां कृणुमो–ऽश्वयुग्भ्यां ॥ **28**

**29.नक्षत्रं – अपभरणी** **देवता – यमः**

अप पाप्मानं भरणी र्भरन्तु । तद् यमो राजा भगवान् विचष्टां ।
लोकस्य राजा महतो महान् हि । सुगन्नः पन्थामभयं कृणोतु ।
यस्मिन् नक्षत्रे यम एति राजा । यस्मिन्नेन–मभ्यषिंचन्त देवाः ।
तदस्य चित्र৩् हविषा यजाम । अप पाप्मानं भरणी र्भरन्तु ॥ **29**

**30.अमावासि**

*निवेशनी यत्ते देवा अदधुः ।*

Below is the full text of the concised Mantra given in “italics” above.
This concised Mantra is formed by adding the First word/part from the first part of the First para , 2nd word /part from first part of Second para of Full Mantra which is given below. Add the Underlined words of the Full Mantra to arrive at the above concised Mantra. It is more appropriate to chant the full version as given below. Please refer to your Guru for any clarifications/explanations.

निवेशनी सङ्गमनी वसूनां ँविश्वा रूपाणि वसून्या–वेशयन्ती ।
सहस्र–पोष৩् सुभगा रराणा सा न आगन् वर्चसा संविँदाना ।

यत्ते देवा अदधु र्भागधेय-ममावास्ये संवँसन्तो महित्वा ।
सा नो यज्ञं पिपृहि विश्ववारे रयिन्नो धेहि सुभगे सुवीरं ॥ **30/107 (27)**

## 31.चन्द्रमा

*नवो नवो भवति जायमानो यमादित्या अ॰शुमा-प्याययन्ति ।*

Below is the full text of the concised Mantra given in “italics” above.
This concised Mantra is formed by adding the First word/part from the first part of the First para , 2nd word /part from first part of Second para of Full Mantra which is given below. Add the Underlined words of the Full Mantra to arrive at the above concised Mantra. It is more appropriate to chant the full version as given below. Please refer to your Guru for any clarifications/explanations.

नवो नवो भवति जायमानोऽह्नां केतु-रुषसा मेत्यग्रे ।
भागं देवेभ्यो विदधात्यायन् प्रचन्द्रमास्तिरिति दीर्घमायुः ।
यमादित्या अ॰शुमाप्याययन्ति यमक्षित-मक्षितयः पिबन्ति ।
तेन नो राजा वरुणो बृहस्पति राप्याययन्तु भुवनस्य गोपाः ।

## 32. अहो रात्री

ये विरूपे समनसा संव्यँयन्ती । समानं तन्तुं परिता-तनाते ।
विभू प्रभू अनुभू विश्वतो हुवे । ते नो नक्षत्रे हवमाग-मेतं ।

वयं देवी ब्रह्मणा संविँदानाः । सुरत्नासो देववीतिं दधानाः । **108**

अहोरात्रे हविषा वर्द्धयन्तः । अति पाप्मान–मतिमुक्त्या गमेम ॥

**33. उषा**

प्रत्युव दृश्यायती । व्युच्छन्ती दुहिता दिवः ।

अपो मही वृणुते चक्षुषा । तमो ज्योतिष्–कृणोति सूनरी ।

उदु स्त्रियास्सचते सूर्यः । स चा उद्यन्नक्षत्र मर्चिमत् ।

तवे दुषो व्युषि सूर्यस्य च । संभक्तेन गमेमहि ॥ **109**

**34. नक्षत्रः**

तन्नो नक्षत्र मर्चिमत् । भानुमत्तेज उच्छरत् ।

उपयज्ञ–मिहागमत् । प्रनक्षत्राय देवाय । इन्द्रा येन्दुं हवामहे ।

स न स्सविता सुवथ् सनिं । पुष्टिदां वीरवत्तमं ॥

## 35. सूर्यः

*उदुत्यं चित्रं ॥*

Below is the full text of the concised Mantra given in "italics" above.
This concised Mantra is formed by adding the First word/part from the first part of the First para , 2nd word /part from first part of Second para of Full Mantra which is given below. Add the Underlined words of the Full Mantra to arrive at the above concised Mantra. It is more appropriate to chant the full version as given below. Please refer to your Guru for any clarifications/explanations.

उदुत्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यं ।

चित्रं देवाना मुदगादनीकं चक्षु र्मित्रस्य वरुणस्याग्नेः ॥ **110**

आऽप्रा द्यावा पृथिवी अन्तरिक्ष॰ सूर्य आत्मा जगतस्तस्थुषश्च ।

## 36. अदितिः

*अदितिर्न उरुष्यतु महीमूषु मातरं ॥*

Below is the full text of the concised Mantra given in "italics" above.
See notes above.

अदितिर्न उरुष्य–त्वदितिः शर्म यच्छतु । अदितिः पात्व॰ हसः।

महीमूषु मातर॰ सुव्रताना–मृतस्य पत्नी मवसे हुवेम ।

तुविक्षत्रा–मजरन्ती मुरूची॰ सुशर्माण–मदिति॰ सुप्रणीतिं ।

**37. विष्णुः**

*इदं ँविष्णु प्रतद्विष्णुः ॥*

Below is the full text of the concised Mantra given in “italics” above. See notes above

| |
|---|
| इदं ँविष्णु र्विचक्रमे त्रेधा निदधे पदं । समूढमस्य पाᳬ सुरे । |
| प्रतद्विष्णु स्तवते वीर्याय । मृगो न भीमः कुचरो गिरिष्ठाः। |
| यस्योरुषु त्रिषु विक्रमणेषु । अधिक्षियन्ति भुवनानि विश्वा ॥ **111** |

**38. अग्निः**

*अग्निर् मूर्धा भुवः ॥*

Below is the full text of the concised Mantra given in “italics” above. See notes above

| |
|---|
| अग्नि र्मूर्धा दिवः ककुत्पतिः पृथिव्या अयं । |
| अपाᳬ रेताᳬसि जिन्वति । |
| भुवो यज्ञस्य रजसश्च नेता यत्रा नियुद्भिः सचसे शिवाभिः । |
| दिवि मूर्धानं दधिषे सुवर्षां जिह्वामग्ने चकृषे हव्यवाहं । |

## 39. अनुमती

*अनुनो–ऽद्यानुमति–रन्विदनुमते त्वं ॥*

Below is the full text of the concised Mantra given in “italics” above. See notes above.

| |
|---|
| अनुनोऽद्यानुमति र्यज्ञं देवेषु मन्यतां । |
| अग्निश्च हव्यवाहनो भवतां दाशुषे मयः । |
| अन्विदनुमते त्वं मन्यासै शंच नः कृधि । |
| क्रत्वे दक्षाय नो हिनु प्रण आयूꣳषि तारिषः । |

## 40. हव्यवाहः (अग्निः)

*हव्य वाहꣳ स्विष्टं ॥*

Below is the full text of the concised Mantra given in “italics” above. **

| |
|---|
| हव्यवाहमभि–मातिषाहं । रक्षोहणं पृतनासु जिष्णुं । |
| ज्योतिष्मन्तं दीद्यतं पुरन्धिं । अग्निꣳ स्विष्ट कृतमा हुवेम । |
| स्विष्ट मग्ने अभितत् पृणाहि । विश्वा देव पृतना अभिष्य । |
| उरुन्नः पन्थां प्रदिशन् विभाहि । |
| ज्योतिष्मद्धेह्य जरन्न आयुः ॥ **112/28** |

## *1.37 नक्षत्र उपहोम मन्त्रा:*

**1. कृत्तिका**

अग्नये स्वाहा कृत्तिकाभ्य स्स्वाहा । अंबायै स्वाहा दुलायै स्वाहा ।
नितत्न्यै स्वाहा ऽभ्रयन्त्यै स्वाहा । मेघयन्त्यै स्वाहा वर्षयन्त्यै स्वाहा ।
चुपुणीकायै स्वाहा ॥

**2. रोहिणी**

प्रजापतये स्वाहा रोहिण्यै स्वाहा । रोचमानायै स्वाहा प्रजाभ्य स्वाहा ॥

**3.मृगशीर्षः**

सोमाय स्वाहा मृगशीर्षाय स्वाहा । इन्वकाभ्य स्स्वाहौषधीभ्य स्स्वाहा ।
राज्याय स्वाहा–ऽभिजित्यै स्वाहा ॥ 113

**4. आर्द्रा**

रुद्राय स्वाहाऽऽर्द्रायै स्वाहा । पिन्वमानायै स्वाहा पशुभ्य स्स्वाहा ॥

**5. पुनर्वसु**

अदित्यै स्वाहा पुनर्वसुभ्यां । स्वाहा भूत्यै स्वाहा प्रजात्यै स्वाहा ॥

**6.पुष्यः**

बृहस्पतये स्वाहा तिष्याय स्वाहा । ब्रह्मवर्चसाय स्वाहा ॥

**7. आश्रेषं**

सर्पेभ्य स्स्वाहा ऽऽश्रेषाभ्य स्स्वाहा । दन्दशूकेभ्य स्स्वाहा ॥

**8. मघा**

पितृभ्य स्स्वाहा मघाभ्यः । स्वाहा ऽनघाभ्य स्स्वाहा ऽगदाभ्यः ।
स्वाहारुन्धतीभ्य स्स्वाहा ॥ **114**

**9.पूर्व फल्गुनी**

अर्यम्णे स्वाहा फल्गुनीभ्या॒ स्वाहा । पशुभ्य स्स्वाहा ॥

**10. उत्तर फल्गुनी**

भगाय स्वाहा फल्गुनीभ्या॒ स्वाहा । श्रैष्ठयाय स्वाहा ॥

**11. हस्तः**

सवित्रे स्वाहा हस्ताय । स्वाहा ददते स्वाहा पृणते ।
स्वाहा प्रयच्छते स्वाहा प्रतिगृभ्णते स्वाहा ॥

**12. चित्रा**

त्वष्ट्रे स्वाहा चित्रायै स्वाहा । चैत्राय स्वाहा प्रजायै स्वाहा ॥

**13. स्वाति**

वायवे स्वाहा निष्ट्यायै स्वाहा । कामचाराय स्वाहा ऽभिजित्यै स्वाहा ॥

**14. विशाखा**

इन्द्राग्निभ्या७ँ स्वाहा विशाखाभ्या७ँ स्वाहा । श्रैष्ठयाय स्वाहा
ऽभिजित्यै स्वाहा ॥

**15. पौर्णमासि**

पौर्णमास्यै स्वाहा कामाय स्वाहा गत्यै स्वाहा ॥ **115 (29)**

**16. अनूराधा**

मित्राय स्वाहा–ऽनूराधेभ्य स्स्वाहा । मित्रधेयाय स्वाहा–
ऽभिजित्यै स्वाहा ॥

**17. ज्येष्ठा**

इन्द्राय स्वाहा ज्येष्ठायै स्वाहा । ज्यैष्ठयाय स्वाहा–ऽभिजित्यै स्वाहा ॥

**18. मूलं**

प्रजापतये स्वाहा मूलाय स्वाहा । प्रजायै स्वाहा ॥

**19. पूर्वाषाढा**

अद्भ्य स्स्वाहा ऽषाढाभ्य स्स्वाहा । समुद्राय स्वाहा कामाय स्वाहा ।
अभिजित्यै स्वाहा ॥

**20. उत्तराषाढा**

विश्वेभ्यो देवेभ्य स्स्वाहा ऽषाढाभ्य स्स्वाहा ।
अनपजय्याय स्वाहा जित्यै स्वाहा ॥ **116**

**21. अभिजित्**

ब्रह्मणे स्वाहा ऽभिजिते स्वाहा । ब्रह्म लोकाय स्वाहा ऽभिजित्यै स्वाहा ॥

**22. श्रवणं**

विष्णवे स्वाहा श्रोणायै स्वाहा । श्लोकाय स्वाहा श्रुताय स्वाहा ॥

**23. श्रविष्ठा**

वसुभ्य स्स्वाहा श्रविष्ठाभ्य स्स्वाहा । अग्राय स्वाहा परीत्यै स्वाहा ॥

**24. शतभिषक्**

वरुणाय स्वाहा शतभिषजे स्वाहा । भेषजेभ्य स्स्वाहा ॥

**25. पूर्व प्रोष्ठपदा**

अजायैकपदे स्वाहा प्रोष्ठपदेभ्य स्स्वाहा । **117**

तेजसे स्वाहा ब्रह्मवर्चसाय स्वाहा ॥

**26. उत्तर प्रोष्ठपदा**

अहये बुध्नियाय स्वाहा प्रोष्ठपदेभ्य स्स्वाहा । प्रतिष्ठायै स्वाहा ॥

**27. रेवति**

पूष्णे स्वाहा रेवत्यै स्वाहा । पशुभ्य स्स्वाहा ॥

**28. अश्विनी**

अश्विभ्या॑ स्वाहा ऽश्वयुग्भ्या॑ स्वाहा । श्रोत्राय स्वाहा श्रुत्यै स्वाहा ॥

**29. अपभरणि**

यमाय स्वाहा ऽपभरणीभ्य स्स्वाहा । राज्याय स्वाहा ऽभिजित्यै स्वाहा ॥

**30. अमावासि**

अमावास्यायै स्वाहा कामाय स्वाहा ऽऽगत्यै स्वाहा ॥ **118 (30)**

***31. चन्द्रमा***

चन्द्रमसे स्वाहा प्रतीदृश्यायै स्वाहा ।

अहोरात्रेभ्य स्स्वाहा–ऽर्द्धमासेभ्य स्स्वाहा ।

मासेभ्य स्स्वाहर्तुभ्य स्स्वाहा । संवँथ्सराय स्वाहा ॥

**32. अहो रात्री**

अह्ने स्वाहा रात्रियै स्वाहा । अतिमुक्त्यै स्वाहा ॥

**33. उषा**

उषसे स्वाहा व्युष्टयै स्वाहा । व्यूषुष्यै स्वाहा व्युच्छन्त्यै स्वाहा ।

व्युष्टायै स्वाहा ॥

**34. नक्षत्रः**

नक्षत्राय स्वाहोदेष्यते स्वाहा । **119**

उद्यते स्वाहो–दिताय स्वाहा । हरसे स्वाहा भरसे स्वाहा ।

भ्राजसे स्वाहा तेजसे स्वाहा । तपसे स्वाहा ब्रह्मवर्चसाय स्वाहा ॥

**35. सूर्यः**

सूर्याय स्वाहा नक्षत्रेभ्य स्स्वाहा । प्रतिष्ठायै स्वाहा ॥

**36. अदितिः**

अदित्यै स्वाहा प्रतिष्ठायै स्वाहा ॥

**37. विष्णुः**

विष्णवे स्वाहा यज्ञाय स्वाहा । प्रतिष्ठायै स्वाहा ॥ **120**

---

दधिक्राव्णो अकारिषं । जिष्णो रश्वस्य वाजिनः ।
सुरभि नो मुखा करत् । प्रण आयुꣳषि तारिषत् ।
आपोहिष्ठा मयोभुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे ।
यो वश्शिवतमो रसस्तस्य भाजयते ह नः ।
उशतीरिव मातरः । तस्मा अरङ्गमाम वो यस्य क्षयाय जिन्वथ ।
आपो जनयथा च नः ॥ **121 (32)**

## *1.38 वरुण सूक्तं*

उदुत्तमं ँवरुण पाश मस्म-दवाधमं विमध्यम७ श्रथाय ।
अथा वयमादित्य व्रते तवानागसो अदितये स्याम ॥
अस्तभ् नाद्ध्या मृषभो अन्तरिक्ष ममिमीत वरिमाणं पृथिव्या
आस्सीदद् विश्वा भुवनानि सम्राड् विश्वेत्तानि वरुणस्य व्रतानि ॥
यत्किञ्चेदं ँव्वरुण दैव्ये जनेऽभिद्रोहं मनुष्या-श्चरामसि ।
अचित्ती यत्तव धर्मा युयोपिम मानस्तस्मा-देनसो देव रीरिषः ॥
कितवासो यद्रि रिपु र्न दीवि यद्वाघा सत्य-मुतयन्न विद्म ।
सर्वा-ताविष्य शिथिरेव देवा था ते स्याम वरुण प्रियासः ॥
अवते हेडो वरुण नमो भिरव यज्ञे-भिरीमहे हविर्भिः ।
क्षयन्न-स्मभ्य मसुर-प्रचेतो राजन्नेना७्सि शिश्रथः कृतानि ॥
तत्वायामि ब्रह्मणा वन्दमान-स्तदा शास्ते यजमानो हविर्भिः ।
अहेडमानो वरुणेह बोद्ध्युरुश७् समान आयुः प्रमोषीः ॥ **122 (33)**

## 1.39 पवमान सूक्तं

हिरण्यवर्णाः शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः ।
अग्निं याँ या गर्भं दधिरे विरूपास्तान आपश्शॅं स्योना भवन्तु ॥
यासाॅं राजा वरुणो याति मद्ध्ये सत्यान् ऋते अवपश्यं जनानां ।
मधुश्चुत–श्शुचयो याः पावकास्ता न आपश्शॅं स्योना भवन्तु ॥
यासां देवा दिवि कृण्वन्ति भक्षय्या अन्तरिक्षे बहुधा भवन्ति ।
याः पृथिवीं पयसोन्दन्ति शुक्रास्ता न आपशॅं स्योना भवन्तु॥
शिवेन मा चक्षुषा पश्यताप श्शिवया तनुवोप स्पृशत त्वचं मे ।
सर्वाॅं अग्नीॅं रप्सुषदो हुवे वो मयि वर्चो बलमोजो निधत्त ॥ **123 (34)**

पवमान–स्सुवर्जनः । पवित्रेण विचर्षणिः । यः पोता स पुनातु मा ।
पुनन्तु मा देवजनाः । पुनन्तु मनवो धिया । पुनन्तु विश्व आयवः ।
जातवेदः पवित्रवत् । पवित्रेण पुनाहि मा । शुक्रेण देव दीद्यत् ।
अग्ने क्रत्वा क्रतूॅं रनु ॥ **124**

यत्ते पवित्र–मर्चिषि । अग्ने वितत–मन्तरा । ब्रह्म तेन पुनीमहे ।
उभाभ्यां देव सवितः । पवित्रेण सवेन च । इदं ब्रह्म पुनीमहे ।
वैश्वदेवी पुनती देव्यागात् । यस्यै बह्वी–स्तनुवो वीतपृष्ठाः ।
तया मदन्त–स्सधमाद्येषु । वय७ स्याम पतयो रयीणां ॥ **125**

वैश्वानरो रश्मिभिर्मा पुनातु । वातः प्राणेनेषिरो मयो भूः ।
द्यावा पृथिवी पयसा पयोभिः । ऋतावरी यज्ञिये मा पुनीतां ।
बृहद्भि–स्सवितस्तृभिः । वर्षिष्ठै र्देवमन्मभिः । अग्ने दक्षैः पुनाहि मा ।
येन देवा अपुनत । येनापो दिव्यंकशः । तेन दिव्येन ब्रह्मणा ॥ **126**

इदं ब्रह्म पुनीमहे । यः पावमानी रद्ध्येति ।
ऋषिभि–स्संभृत७ रसं । सर्व७ स पूतमश्नाति ।
स्वदितं मातरिश्वना । पावमानीर्यो अद्ध्येति ।
ऋषिभि–स्संभृत७ रसं । तस्मै सरस्वती दुहे ।
क्षीर७ सर्पि र्मधूदकं । पावमानी स्स्वस्त्ययनीः ॥ **127**

सुदुघाहि पयस्वतीः । ऋषिभि–स्संभृतो रसः ।
ब्राह्मणेष्व–मृत७ँ हितं । पावमानी र्दिशन्तु नः ।
इमं ँलोकमथो अमुं । कामान्थ् समद्ध्र्यन्तु नः ।
देवी र्देवैः समाभृताः । पावमानी–स्स्वस्त्ययनीः ।
सुदुघाहि घृतश्चुतः । ऋषिभि–स्संभृतो रसः ॥ **128**

ब्राह्मणेष्वमृत७ँ हितं । येन देवाः पवित्रेण ।
आत्मानं पुनते सदा । तेन सहस्र धारेण ।
पावमान्यः पुनन्तु मा । प्राजापत्यं पवित्रं ।
शतोद्यामं७ँ हिरण्मयं । तेन ब्रह्म विदो वयं ।
पूतं ब्रह्म पुनीमहे । इन्द्र–स्सुनीती सहमा पुनातु ।
सोमस्स्वस्त्या वरुण–स्समीच्या । यमो राजा प्रमृणाभिः पुनातु मा ।
जातवेदा मोर्जयन्त्या पुनातु । भूर्भुवस्सुवः ॥ **129 (35)**

ओं तच्छंय्योँरा वृणीमहे । गातुं यँज्ञाय । गातुं यँज्ञपतये ।

दैवीस्स्वस्तिरस्तु नः । स्वस्ति र्मानुषेभ्यः । ऊद्ध्र्वं जिगातु भेषजं ।

शन्नो अस्तु द्विपदे । शं चतुष्पदे ॥ **130 (36)**

ओं शान्तिः शान्तिः शान्तिः ॥

( उदकशान्ति समाप्तं )

---

# 1.40 नक्षत्र सूक्तं (नक्षत्र जप मन्त्राः)

## 1. नक्षत्रं – कृत्तिका

अग्निर्नः पातु कृत्तिकाः । नक्षत्रं देवमिन्द्रियं । इदमासां–विचक्षणं ।
हविरासं जुहोतन । यस्य भान्ति रश्मयो यस्य केतवः ।
यस्येमा विश्वा भुवनानि सर्वा । स कृत्तिकाभिरभि–सँवसानः ।
अग्निर्नो देवस्सुविते दधातु ॥ **1**

अग्नये स्वाहा कृत्तिकाभ्य स्स्वाहा । अंबायै स्वाहा दुलायै स्वाहा ।
नितल्यै स्वाहा ऽभ्रयन्त्यै स्वाहा । मेघयन्त्यै स्वाहा वर्षयन्त्यै स्वाहा ।
चुपुणीकायै स्वाहा ।

(कृत्तिका नक्षत्र देवतायै अग्नये नमः )

## 2. नक्षत्रं – रोहिणी

प्रजापते रोहिणी वेतु पत्नी । विश्वरूपा बृहती चित्रभानुः ।
सा नो यज्ञस्य सुविते दधातु । यथा जीवेम शरदस्सवीराः ।
रोहिणी देव्युदगात् पुरस्तात् । विश्वा रूपाणि प्रतिमोदमाना ।

प्रजापति८ हविषा वर्धयन्ती । प्रिया देवाना-मुपयातु यज्ञं ॥ 2

प्रजापतये स्वाहा रोहिण्यै स्वाहा ।

रोचमानायै स्वाहा प्रजाभ्य स्वाहा ।

(रोहिणी नक्षत्र देवातायै प्रजापतये नमः)

## 3. नक्षत्रं – मृगशीर्षः

सोमो राजा मृगशीर्षेण आगन्न् । शिवं नक्षत्रं प्रियमस्य धाम ।

आप्यायमानो बहुधा जनेषु । रेतः प्रजां यजमाने दधातु ।

यत्ते नक्षत्रं मृगशीर्षमस्ति । प्रिय८ राजन् प्रियतमं प्रियाणां ।

तस्मै ते सोम हविषा विधेम । शन्न एधि द्विपदे शंचतुष्पदे ॥ 3

सोमाय स्वाहा मृगशीर्षाय स्वाहा ।

इन्वकाभ्य स्स्वाहौषधीभ्य स्स्वाहा ।

राज्याय स्वाहा-ऽभिजित्यै स्वाहा ।

(मृगषीर्ष नक्षत्र देवतायै सोमाय नमः)

**4. नक्षत्रं – आर्द्रा**

आर्द्रया रुद्रः प्रथमा न एति । श्रेष्ठो देवानां पतिरघ्नियानां ।
नक्षत्रमस्य हविषा विधेम । मा नः प्रजाꣳ रीरिषन् मोत वीरान् ।
हेती रुद्रस्य परिणो वृणक्तु । आर्द्रा नक्षत्रं जुषताꣳ हविर्नः ।
प्रमुञ्चमानौ दुरितानि विश्वा । अपाघशꣳ सन्नु–दतामरातिं ॥ 4

रुद्राय स्वाहाऽऽर्द्रायै स्वाहा ।
पिन्वमानायै स्वाहा पशुभ्य स्स्वाहा ।

(आर्द्रा नक्षत्र देवतायै रुद्राय नमः )

**5. नक्षत्रं – पुनर्वसु**

पुनर्नो देव्यदिति–स्पृणोतु । पुनर्वसू नः पुनरेतां यज्ञं ।
पुनर्नो देवा अभियन्तु सर्वे । पुनः पुनर्वो हविषा यजामः ।
एवा न देव्य–दितिर–नर्वा । विश्वस्य भर्त्री जगतः प्रतिष्ठा ।
पुनर्वसू हविषा वर्धयन्ती । प्रियं देवाना–मप्येतु पाथः ॥ 5

अदित्यै स्वाहा पुनर्वसुभ्यां । स्वाहा भूत्यै स्वाहा प्रजात्यै स्वाहा ।

(पुनर्वसु  नक्षत्र देवतायै अदित्यै नमः )

**6. नक्षत्रं – पुष्यः**

बृहस्पतिः प्रथमञ्जायमानः । तिष्यं नक्षत्रमभि संबभूव ।
श्रेष्ठो देवानां पृतनासु जिष्णुः । दिशो नु सर्वा अभयन्नो अस्तु ।
तिष्यः पुरस्तादुत मध्यतो नः । बृहस्पति र्नः परिपातु पश्चात् ।
बाधे तान् द्वेषो अभयं कृणुतां । सुवीर्यस्य पतयस्याम ॥ 6

बृहस्पतये स्वाहा तिष्याय स्वाहा । ब्रह्मवर्चसाय स्वाहा ।

(पुष्य नक्षत्र देवतायै बृहस्पतये नमः )

**7. नक्षत्रं – आश्रेषा**

इद७ँ सर्पेभ्यो हविरस्तु जुष्टं । आश्रेषा येषा मनुयन्ति चेतः ।
ये अन्तरिक्षं पृथिवीं–क्षियन्ति । तेन स्सर्पासो हवमागमिष्ठाः ।
ये रोचने सूर्यस्यापि सर्पाः । ये दिवं देवीमनु–सञ्चरन्ति ।

येषामाश्रेषा अनुयन्ति कामं । तेभ्य–स्सर्पेभ्यो मधु–मज्जुहोमि ॥ **7**

सर्पेभ्य स्स्वाहा ऽऽश्रेषाभ्य स्स्वाहा । दन्दशूकेभ्य स्स्वाहा ।

(आश्रेषा नक्षत्र देवतायै सर्पेभ्यो नमः )

**8. नक्षत्रं – मघा**

उपहूताः पितरो ये मघासु । मनोजवस–स्सुकृत–स्सुकृत्याः ।

ते नो नक्षत्रे हवमागमिष्ठाः । स्वधाभि र्यज्ञं प्रयतं जुषन्तां ।

ये अग्निदग्धा येऽनग्नि–दग्धाः । येऽमुल्लोकं पितरः क्षियन्ति ।

याꣳश्च विद्मयाꣳ उ च न प्रविद्म । मघासु यज्ञꣳ सुकृतं जुषन्तां ॥ **8**

पितृभ्य स्स्वाहा मघाभ्यः । स्वाहा ऽनघाभ्य स्स्वाहा ऽगदाभ्यः ।

स्वाहारुन्धतीभ्य स्स्वाहा ।

(मघा नक्षत्र देवतायै पितृभ्यो नमः )

**9. नक्षत्रं – पूर्वफल्गुनी**

गवां पतिः फल्गुनी–नामसि त्वं । तद र्यमन् वरुण मित्र चारु ।

तंत्वा वयꣳ सनितारꣳ सनीनां । जीवा जीवन्तमुप सँविशेम ।

येनेमा विश्वा भुवनानि सञ्जिता । यस्य देवा अनुसँय्यन्ति चेतः ।
अर्यमा राजाऽजरस्तु विष्मान् । फल्गुनीना–मृषभो रोरवीति ॥ 9

अर्यम्णे स्वाहा फल्गुनीभ्याꣳ स्वाहा । पशुभ्य स्स्वाहा ।

(पूर्वफल्गुनी नक्षत्र देवतायै अर्यम्णे नमः )

**10. नक्षत्रं – उत्तर फल्गुनी**

श्रेष्ठो देवानां भगवो भगासि । तत्त्वा विदुः फल्गुनी–स्तस्य वित्तात् ।
अस्मभ्यं–क्षत्रमजरꣳ सुवीर्यं । गोमदश्व–वदुपसन्नु–देह ।
भगोह दाता भग इत्प्रदाता । भगो देवीः फल्गुनी–राविवेश ।
भगस्येत्तं प्रसवं गमेम । यत्र देवै–स्सधमादं मदेम । ॥ 10

भगाय स्वाहा फल्गुनीभ्याꣳ स्वाहा । श्रैष्ठयाय स्वाहा ।

(उत्तरफल्गुनी नक्षत्र देवतायै भगाय नमः )

**11. नक्षत्रं – हस्तः**

आयातु देव–स्सवितोपयातु । हिरण्ययेन सुवृता रथेन ।
वहन् हस्त॑ सुभगं विद्मनापसं । प्रयच्छन्तं पपुरिं पुण्यमच्छ ।
हस्तः प्रयच्छ त्वमृतं वसीयः । दक्षिणेन प्रतिगृभ्णीम एनत् ।
दातार–मद्य सविता विदेय । यो नो हस्ताय प्रसुवाति यज्ञं ॥ **11**

सवित्रे स्वाहा हस्ताय । स्वाहा ददते स्वाहा पृणते ।
स्वाहा प्रयच्छते स्वाहा प्रतिगृभ्णते स्वाहा ।

(हस्त नक्षत्र देवतायै सवित्रे नमः )

**12. नक्षत्रं – चित्रा**

त्वष्टा नक्षत्र–मभ्येति चित्रां । सुभ॑ ससं–यँुवति॑ रोचमानां ।
निवेशयन्न–मृतान् मर्त्या॑श्च । रूपाणि पि॑शन् भुवनानि विश्वा ।
तन्नस्त्वष्टा तदु चित्रा विचष्टां । तन्नक्षत्रं भूरिदा अस्तु मह्यं ।
तन्नः प्रजां वीँरवती॑ सनोतु । गोभिर्नो अश्वै–स्समनक्तु यज्ञं ॥ **12**

त्वष्ट्रे स्वाहा चित्रायै स्वाहा । चैत्राय स्वाहा प्रजायै स्वाहा ।

(चित्रा नक्षत्र देवतायै त्वष्ट्रे नमः )

**13. नक्षत्रं – स्वाती**

वायु र्नक्षत्र–मभ्येति निष्ट्यां । तिग्मशृंगो वृषभो रोरुवाणः ।
समीरयन् भुवना मातरिश्वा । अप द्वेषा॑ꣳसि नुद–तामरातीः ।
तन्नो वायस्तदु निष्ट्या शृणोतु । तन्नक्षत्रं भूरिदा अस्तु मह्यं ।
तन्नो देवासो अनु जानन्तु कामं । यथा तरेम दुरितानि विश्वा ॥ 13

वायवे स्वाहा निष्ट्यायै स्वाहा ।
कामचाराय स्वाहा ऽभिजित्यै स्वाहा ।

(स्वाती  नक्षत्र देवतायै वायवे नमः )

**14. नक्षत्रं – विशाखा**

दूरम–स्मच्छत्रवो यन्तु भीताः । तदिन्द्राग्नी कृणुतां तद् विशाखे ।
तन्नो देवा अनुमदन्तु यज्ञं । पश्चात् पुरस्ता –दभयन्नो अस्तु ।

नक्षत्राणा–मधिपत्नी विशाखे । श्रेष्ठा–विन्द्राग्नी भुवनस्य गोपौ ।
विषूच–श्शत्रूनप–बाधमानौ । अपक्षुध–न्नुदतामरातिं ।॥ 14

इन्द्राग्निभ्या७ स्वाहा विशाखाभ्या७ स्वाहा ।
श्रैष्ठयाय स्वाहा ऽभिजित्यै स्वाहा ।

**(विशाखा नक्षत्र देवतायै इन्द्राग्निभ्यां नमः )**

**15. पौर्णमासि**

पूर्णा पश्चादुत पूर्णा पुरस्तात् । उन्मध्यतः पौर्णमासी जिगाय ।
तस्यां देवा अधि सँवसन्तः । उत्तमे नाक इह मादयन्तां ।
पृथ्वी सुवर्चा युवति–स्सजोषाः । पौर्णमास्युदगा–च्छोभमाना ।
आप्याय–यन्ती दुरितानि विश्वा । उरुं दुहां यँजमानाय यज्ञं ।॥ 15

पौर्णमास्यै स्वाहा कामाय स्वाहा गत्यै स्वाहा ।

**(पौर्ण्यमास्यै नमः )**

**16. नक्षत्रं – अनूराधा**

ऋद्ध्यास्म हव्यै र्नमसोप–सद्य । मित्रं देवं मित्रधेयन्नो अस्तु ।
अनूराधान् हविषा वर्द्धयन्तः । शतं जीवेम शरदस्सवीराः ।
चित्रं–नक्षत्र–मुदगात् पुरस्तात् । अनूराधास इति यद् वदन्ति ।
तन्मित्र एति पथिभि र्देवयानैः । हिरण्ययै र्विततै–रन्तरिक्षे ॥ 16

मित्राय स्वाहा–ऽनूराधेभ्य स्स्वाहा ।
मित्रधेयाय स्वाहा–ऽभिजित्यै स्वाहा ।

( अनूराधा नक्षत्र देवतायै मित्राय नमः )

**17. नक्षत्रं – ज्येष्ठा**

इन्द्रो ज्येष्ठा मनु नक्षत्रमेति । यस्मिन् वृत्रं वृँत्र तूर्ये ततार ।
तस्मिन् वय–ममृतं दुहानाः । क्षुधन्तरेम दुरितिं दुरिष्टिं ।
पुरन्दराय वृषभाय धृष्णवे । अषाढाय सहमानाय मीढुषे ।
इन्द्राय ज्येष्ठा मधुमद्दुहाना । उरुं कृणोतु यजमानाय लोकं ॥ 17

इन्द्राय स्वाहा ज्येष्ठायै स्वाहा । ज्यैष्ठयाय स्वाहा–ऽभिजित्यै स्वाहा ।

( ज्येष्ठा नक्षत्र देवतायै इन्द्राय नमः )

**18. नक्षत्रं – मूलं**

मूलं प्रजां वीरवतीं ँविदेय । पराच्येतु निऋतिः पराचा ।
गोभि र्नक्षत्रं पशुभि–स्समक्तं । अह र्भूयाद् यजमानाय मह्यं ।
अहर्नो अद्य सुविते दधातु । मूलं नक्षत्रमिति यद् वदन्ति ।
पराचीं ँवाचा निऋतिं नुदामि । शिवं प्रजायै शिवमस्तु मह्यं ॥ **18**

प्रजापतये स्वाहा मूलाय स्वाहा । प्रजायै स्वाहा ।

(मूला नक्षत्र देवतायै प्रजापतये नमः )

**19. नक्षत्रं – पूर्वाषाढा**

या दिव्या आपः पयसा संबभूवुः । या अन्तरिक्ष उत पार्थिवीर्याः ।
यासामषाढा अनुयन्ति कामं । ता न आपश्शं स्योना भवन्तु ।
याश्च कूप्या याश्च नाद्या–स्समुद्रियाः । याश्च वैशन्तीरुत प्रासचीर्याः ।

यासामषाढा मधु भक्षयन्ति । ता न आपः शऽ स्योना भवन्तु ॥ 19

अद्भ्य स्स्वाहा ऽषाढाभ्य स्स्वाहा ।

समुद्राय स्वाहा कामाय स्वाहा । अभिजित्यै स्वाहा ।

( पूर्वाषाढा नक्षत्र देॆवतायै अद्भ्यॊ नमः )

**20. नक्षत्रं – उत्तराषाढा**

तन्नॊ विश्वे उप शृण्वन्तु देॆवाः । तदषाढा अभिसं यन्तु यज्ञं ।

तन्नक्षत्रं प्रथतां पशुभ्यः । कृषि र्वृष्टि र्यजमानाय कल्पतां ।

शुभ्राः कन्या युवतय–स्सुपेशसः । कर्मकृत–स्सुकृतॊ वीर्यावतीः ।

विश्वान् देॆवान् हविषा वर्द्धयन्तीः । अषाढाः काम मुपयान्तु यज्ञं ॥ 20

विश्वेभ्यॊ देॆवेभ्य स्स्वाहा ऽषाढाभ्य स्स्वाहा ।

अनपजय्याय स्वाहा जित्यै स्वाहा ।

(उत्तराषाढा नक्षत्र देॆवतायै विश्वेभ्यॊ देॆवेभ्यॊ नमः )

**21. नक्षत्रं – अभिजित्**

यस्मिन् ब्रह्माऽभ्यजयथ् सर्वमेतत् । अमुञ्च लोक मिदमूच सर्वं।

तन्नो नक्षत्र–मभिजिद् विजित्य । श्रियं दधात्व–हृणीयमानं ।

उभौ लोकौ ब्रह्मणा सञ्जितेमौ । तन्नो नक्षत्र–मभिजिद् विचष्टां ।

तस्मिन् वयं पृतनास्सं जयेम । तन्नो देवासो अनुजानन्तु कामं ॥ 21

ब्रह्मणे स्वाहा ऽभिजिते स्वाहा ।

ब्रह्म लोकाय स्वाहा ऽभिजित्यै स्वाहा।

(अभिजित् नक्षत्र देवतायै ब्रह्मणे नमः )

**22. नक्षत्रं – श्रवणं**

शृण्वन्ति श्रोणा–ममृतस्य गोपां । पुण्यामस्या उपशृणोमि वाचं ।

महीं देवीं ँविष्णुपत्नी मजूर्यां । प्रतीची मेना८ हविषा यजामः ।

त्रेधा विष्णु–रुरुगायो विचक्रमे । महीं दिवं पृथिवी–मन्तरिक्षं ।

तच्छ्रोणैति श्रव–इच्छमाना । पुण्य७ श्लोकं ँयजमानाय कृण्वती ॥ 22

विष्णवे स्वाहा श्रोणायै स्वाहा । श्लोकाय स्वाहा श्रुताय स्वाहा ।

(श्रवण नक्षत्र देवतायै विष्णवे नमः )

**23. नक्षत्रं – श्रविष्टा**

अष्टौ देवा वसवस्सोम्यासः । चतस्रो देवी रजराः श्रविष्ठाः ।
ते यज्ञं पान्तु रजसः परस्तात् । संवँथ्सरीण–ममृत७ स्वस्ति ।
यज्ञं नः पान्तु वसवः पुरस्तात् । दक्षिणतो–ऽभियन्तु श्रविष्ठाः ।
पुण्यन्नक्षत्रमभि सँविशाम । मा नो अराति–रघश७ सागन् ॥ 23

वसुभ्य स्स्वाहा श्रविष्ठाभ्य स्स्वाहा । अग्राय स्वाहा परीत्यै स्वाहा ।

(श्रविष्टा नक्षत्र देवतायै वसुभ्यो नमः )

**24. नक्षत्रं – शतभिषक्**

क्षत्रस्य राजा वरुणोऽधिराजः । नक्षत्राणा७ शतभिषग् वसिष्ठः ।
तौ देवेभ्यः कृणुतो दीर्घमायुः । शत७ सहस्रा भेषजानि धत्तः ।
यज्ञन्नो राजा वरुण उपयातु । तन्नो विश्वे अभि सँय्यन्तु देवाः ।

तन्नो नक्षत्र७ँ शतभिषग् जुषाणं । दीर्घमायुः प्रतिरद् भेषजानि ॥ 24

वरुणाय स्वाहा शतभिषजे स्वाहा । भेषजेभ्य स्स्वाहा । 

(शतभिषक् नक्षत्र देवतायै वरुणाय नमः )

**25. नक्षत्रं – पूर्वप्रोष्ठपदा**

अज एकपा दुदगात् पुरस्तात् । विश्वा भूतानि प्रति मोदमानः ।
तस्य देवाः प्रसवं यँन्ति सर्वे । प्रोष्ठपदासो अमृतस्य गोपाः ।
विभ्राजमान–स्समिधा न उग्रः । आऽन्तरिक्ष–मरुहद–गन्द्यां ।
त७ँ सूर्यं देव–मजमेकपादं । प्रोष्ठपदासो अनुयन्ति सर्वे ॥ 25

अजायै कपदे स्वाहा प्रोष्ठपदेभ्य स्स्वाहा ।
तेजसे स्वाहा ब्रह्मवर्चसाय स्वाहा ।

( पूर्वप्रोष्ठपदा नक्षत्र देवतायै अजाय एकपदे नमः )

**26. नक्षत्रं – उत्तरप्रोष्ठपदा**

अहि र्बुद्ध्नियः प्रथमान एति । श्रेष्ठो देवानामुत मानुषाणां ।
तं ब्राह्मणा–स्सोमपा–स्सोम्यासः । प्रोष्ठपदासो अभिरक्षन्ति सर्वे ।

चत्वार एकमभि कर्म देवाः । प्रोष्ठपदास इति यान् वदन्ति ।
ते बुद्ध्नियं परिषद्य॑ स्तुवन्तः । अहि॑ रक्षन्ति नमसोप सद्य ॥ 26

अहये बुध्नियाय स्वाहा प्रोष्ठपदेभ्य स्स्वाहा । प्रतिष्ठायै स्वाहा ।

(उत्तरप्रोष्ठपदा नक्षत्र देवतायै अहये बुध्नियाय नमः )

**27. नक्षत्रं – रेवती**

पूषा रेवत्यन्वेति पन्थां । पुष्टिपती पशुपा वाजबस्त्यौ ।
इमानि हव्या प्रयता जुषाणा । सुगैर्नो यानैरुपयातां यज्ञं ।
क्षुद्रान् पशून् रक्षतु रेवती नः । गावो नो अश्वा॑ अन्वेतु पूषा ।
अन्न॑ रक्षन्तौ बहुधा विरूपं । वाज॑ सनुतां यजमानाय यज्ञं ॥ 27

पूष्णे स्वाहा रेवत्यै स्वाहा । पशुभ्य स्स्वाहा ।

(रेवती नक्षत्र देवतायै पूष्णे नमः )

## 28 नक्षत्रं – अश्विनी

तदश्विना–वश्वयुजो–पयातां । शुभङ्गमिष्ठौ सुयमेभिरश्वैः ।
स्वन्नक्षत्रꣳ हविषा यजन्तौ । मध्वा–संपृक्तौ यजुषा समक्तौ ।
यौ देवानां भिषजौ हव्यवाहौ । विश्वस्य दूता–वमृतस्य गोपौ ।
तौ नक्षत्रं–जुजुषाणो–पयातां । नमोऽश्विभ्यां कृणुमो–ऽश्वयुग्भ्यां ॥ 28

अश्विभ्याꣳ स्वाहा ऽश्वयुग्भ्याꣳ स्वाहा ।
श्रोत्राय स्वाहा श्रुत्यै स्वाहा ।

(अश्विनी नक्षत्र देवतायै अश्विभ्यां नमः )

## 29. नक्षत्रं – अपभरणी

अप पाप्मानं भरणी र्भरन्तु । तद् यमो राजा भगवान् विचष्टां ।
लोकस्य राजा महतो महान् हि । सुगन्नः पन्थामभयं कृणोतु ।
यस्मिन् नक्षत्रे यम एति राजा । यस्मिन्नेन–मभ्यषिंचन्त देवाः ।
तदस्य चित्रꣳ हविषा यजाम । अप पाप्मानं भरणी र्भरन्तु ॥ 29

यमाय स्वाहा ऽपभरणीभ्य स्स्वाहा ।

राज्याय स्वाहा ऽभिजित्यै स्वाहा ।

(अपभरणी नक्षत्र देवतायै यमाय नमः )

**30. अमावासि**

निवेशनी सङ्गमनी वसूनां ँविश्वा रूपाणि वसून्या-वेशयन्ती ।

सहस्र-पोष७ं सुभगा रराणा सा न आगन् वर्चसा संविँदाना ।

यत्ते देवा अदधु र्भागधेय-ममावास्ये संवँसन्तो महित्वा ।

सा नो यज्ञं पिपृहि विश्ववारे रयिन्नो धेहि सुभगे सुवीरं ॥ 30

अमावास्यायै स्वाहा कामाय स्वाहाऽऽगत्यै स्वाहा ॥

(अमावास्यै नमः)

**31. चन्द्रमा**

नवो नवो भवति जायमानोऽह्नां केतु-रुषसा मेत्यग्रे ।

भागं देवेभ्यो विदधात्यायन् प्रचन्द्रमा स्तिरिति दीर्घमायुः ।

यमादित्या अ॒ऽ॒शुमाप्याययन्ति यमक्षित–मक्षितयः पिबन्ति । 
तेन नो राजा वरुणो बृहस्पति राप्याययन्तु भुवनस्य गोपाः ॥ 31

चन्द्रमसे स्वाहा प्रतीदृश्यायै स्वाहा ।
अहोरात्रेभ्य स्स्वाहा ऽर्द्धमासेभ्य स्स्वाहा ।
मासेभ्य स्स्वाहर्तुभ्य स्स्वाहा । संवँथ्सराय स्वाहा ।

(चन्द्रमसे नमः )

**32. अहो रात्री**

ये विरूपे समनसा संव्यँयन्ती । समानं तन्तुं परिता–तनाते ।
विभू प्रभू अनुभू विश्वतो हुवे । ते नो नक्षत्रे हवमाग–मेतं ।
वयं देवी ब्रह्मणा संविँदानाः । सुरत्नासो देववीतिं दधानाः ।
अहोरात्रे हविषा वर्द्धयन्तः । अति पाप्मान–मतिमुक्त्या गमेम । 32

अह्ने स्वाहा रात्रियै स्वाहा । अतिमुक्त्यै स्वाहा ।

(अहो रात्राभ्यां नमः )

**33. उषा**

प्रत्युव दृश्यायती । व्युच्छन्ती दुहिता दिवः ।
अपो मही वृणुते चक्षुषा । तमो ज्योतिष्–कृणोति सूनरी ।
उदु स्त्रियास्सचते सूर्यः । स चा उद्यन्नक्षत्र मर्चिमत् ।
त वेदुषो व्युषि सूर्यस्य च । संभक्तेन गमेमहि । **33**

उषसे स्वाहा व्युष्टयै स्वाहा । व्यूषुष्यै स्वाहा व्युच्छन्त्यै स्वाहा ।
व्युष्टायै स्वाहा ।

(उषसे नमः )

**34. नक्षत्रः**

तन्नो नक्षत्र मर्चिमत् । भानुमत्तेज उच्छरत् ।
उपयज्ञ–मिहागमत् । प्रनक्षत्राय देवाय । इन्द्रा येन्दु\ हवामहे ।
स न स्सविता सुवथ् सनिं । पुष्टिदां वीरवत्तमं । **34**

नक्षत्राय स्वाहोदेष्यते स्वाहा । उद्यते स्वाहो–दिताय स्वाहा ।
हरसे स्वाहा भरसे स्वाहा । भ्राजसे स्वाहा तेजसे स्वाहा ।

तपसे स्वाहा ब्रह्मवर्चसाय स्वाहा । (नक्षत्राय नमः )

**35. सूर्यः**

उदुत्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यं।

चित्रं देवाना मुदगादनीकं चक्षु र्मित्रस्य वरुणस्याग्नेः ।

आऽप्रा द्यावा पृथिवी अन्तरिक्ष७ सूर्य आत्मा जगतस्तस्थुषश्च । 35

सूर्याय स्वाहा नक्षत्रेभ्य स्स्वाहा । प्रतिष्ठायै स्वाहा । (सूर्याय नमः )

**36. अदितिः**

अदितिर्न उरुष्य–त्वदितिः शर्म यच्छतु । अदितिः पात्व७ हसः।

महीमूषु मातर७ सुव्रताना–मृतस्य पत्नी मवसे हुवेम ।

तुविक्षत्रा–मजरन्ती मुरूची७ सुशर्माण–मदिति७ सुप्रणीतिं । 36

अदित्यै स्वाहा प्रतिष्ठायै स्वाहा ।

(अदित्यै नमः )

**37. विष्णुः**

इदं विष्णु र्विचक्रमे त्रेधा निदधे पदं । समूढमस्य पा७ सुरे ।
प्रतद्विष्णु स्तवते वीर्याय । मृगो न भीमः कुचरो गिरिष्ठाः।
यस्योरुषु त्रिषु विक्रमणेषु । अधिक्षियन्ति भुवनानि विश्वा । **37**
विष्णवे स्वाहा यज्ञाय स्वाहा । प्रतिष्ठायै स्वाहा । (विष्णवे नमः )

**38. अग्निः**

अग्नि र्मूर्धा दिवः ककुत्पतिः पृथिव्या अयं । अपा७ रेता७सि जिन्वति ।
भुवो यज्ञस्य रजसश्च नेता यत्रा नियुद्भिः सचसे शिवाभिः ।
दिवि मूर्धानं दधिषे सुवर्षां जिह्वामग्ने चकृषे हव्यवाहं । **38**
(अग्नये नमः )

**39. अनुमती**

अनुनोऽद्यानुमति र्यज्ञं देवेषु मन्यतां ।
अग्निश्च हव्यवाहनो भवतां दाशुषे मयः ।

अन्विदनुमते त्वं मन्यासै शंच नः कृधि ।
क्रत्वे दक्षाय नो हिनु प्रण आयू॑ꣳषि तारिषः ।
(अनुमत्यै नमः ) 39

**40. हव्यवाहः (अग्निः)**

हव्यवाह–मभिमातिषाहं । रक्षोहणं पृतनासु जिष्णुं ।
ज्योतिष्मन्तं दीद्यतं पुरन्धिं ।
अग्निꣳ स्विष्ट कृतमा हुवेम । स्विष्ट मग्ने अभितत् पृणाहि ।
विश्वा देव पृतना अभिष्य । उरुन्नः पन्थां प्रदिशन् विभाहि ।
ज्योतिष्मद्धेह्य जरन्न आयुः ॥ 40
(अग्नये नमः )

नक्षत्रदेवताभ्यो नमः

ओं शान्तिः शान्तिः शान्तिः

---